ISSN : 2229-5577

सागरिका

अङ्कः 50/3-4

ISSN : 2229-5577

सागरिका

त्रैमासिकी संस्कृतशोधपत्रिका

अङ्कः 50/3-4 विक्रमसंवत् 2079 (2022 ई.)
पञ्चाशद्वर्षे तृतीयचतुर्थाङ्कः

संस्थापक-संपादकः
स्व. रामजी उपाध्यायः

संरक्षकः
नीलिमा गुप्ता
कुलपतिः

प्रधानसम्पादकः
राधावल्लभत्रिपाठी

सम्पादकः
आनन्दप्रकाशत्रिपाठी

प्रबन्धसम्पादकः
शशिकुमारसिंहः

सम्पादकमण्डलम्
नौनिहालगौतमः, सञ्जयकुमारः, रामहेतगौतमः, किरण आर्या

सागरिकासमितिः
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

ISSN : 2229-5577 **UGC Approved JN. No.-42268**

सागरिका

SAGARIKA

Quaterly Research Journal in Sanskrit (Peer Reviwed)
Vol. 50/3-4
Four Issues Every Year-June-Sep.-Dec.-March
अङ्कप्रकाशनं प्रतिवर्षम् आषाढ-आश्विन-पौष-चैत्रमासेषु

परामर्शदात्री समितिः

1. प्रो. मुरलीमनोहरः पाठकः, दिल्ली
2. प्रो. महावीर अग्रवालः, हरिद्वारम्
3. प्रो. विन्ध्येश्वरीप्रसादमिश्रः 'विनय', वाराणसी
4. प्रो. रमाकान्तपाण्डेयः, भोपाल
5. प्रो. विष्णुकान्तपाण्डेयः, जयपुरम्
6. प्रो. व्रजकिशोर स्वाइं, ओडिशा

पत्रव्यवहारसङ्केतः

प्रो. आनन्दप्रकाशत्रिपाठी
अध्यक्षः, संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् 470003 (म.प्र.)
Email : sanskritsagar1946@gmail.com

प्रकाशिका – सागरिकासमितिः
संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

सदस्यताशुल्कम्
वार्षिकम् - 100 रुप्यकाणि, आजीवनम् प्रतिव्यक्ति - 1000 रुप्यकाणि,
आजीवनम् प्रतिसंस्थम् - 2000 रुप्यकाणि, प्रत्यङ्कम् - 25 रुप्यकाणि

आवरणचित्रम् : ज्योतिः पटैल

शब्दसज्जा : अमनप्रकाशनम्, नमकमंडी, कटरा, सागरम् (म.प्र.)
मोबा. : 9826434225

सम्पादकीयम्

इदानीं पत्रपत्रिकाणां गरीयसी काचित् पङ्क्तिर्दरीदृश्यते संस्कृतजगति तस्यां स्थितौ संस्कृतशोधपत्रिका सागरिका अग्रिमपङ्क्तौ तिष्ठति। संस्कृतसाहित्यानुसन्धानरतानां विद्वज्जनानां साहित्यविदां नव्यालेखपुरस्सरं 'गागरे' इत्यस्मिन् सागरमिव सम्पूर्यमाणेयं राष्ट्रिया संस्कृतशोधपत्रिका नैरन्तर्यं समाजोदयाय शोधान् संवितनोति। संस्कृत-शास्त्रीय-वैज्ञानिक-दार्शनिक-साहित्य- नाट्यादि-विषय-निगूढां शोधसामग्रीं विदुषां पुरतः परिवेशयन्तीयं कामपि वैश्विकीमधिमान्यतामभिभजते।

पञ्चाशदधिकवर्षेभ्यः सततप्रकाशमानायाः पत्रिकायाः अस्याः अस्मिन्नङ्के विविधात्मकाः शोधालेखाः सम्मिलिताः सन्ति। आगामिष्वङ्केषु परप्रकर्षसम्भावनां समाश्रित्य अपेक्ष्यते तावत् नवीना आलेखाः।

- सम्पादकः

अनुक्रमः

1. संस्कृते स्तोत्रसाहित्यम् - *बालकृष्ण शर्मा* *07*

2. महर्षिपाणिनिना समादृता आचार्यप्रवराः - *किरण आर्या* *24*

3. ध्रुपदीसंस्कृतसाहित्ये गणिकास्थितिविमर्शनम् - *शुभ्रजित सेनः* *31*

4. संस्कृतकाव्यवाङ्मये पर्यावरणसुरक्षाप्रसङ्गे एका समीक्षा - *भोलेश्वरप्रधानः* *44*

5. भारतीयशिक्षा, उत्तमदीक्षा - *सुकदेव वाजपेयी* *52*

6. रामजी-उपाध्यायस्य सारस्वतयोगदानम् - *नौनिहालगौतमः* *57*

7. ''हिमाचलप्रदेशे संस्कृत-संरक्षणदिशि शासकानां प्रशासकानाञ्च योगदानम्'' - *दिनेशशर्माभारद्वाजः* *65*

8. विनिबन्ध-समीक्षा - *गणेशीलालःसुथारः* *76*

1

संस्कृते स्तोत्रसाहित्यम्

बालकृष्णशर्मा

संस्कृतभाषा विश्वस्य प्राचीनतमासु भाषासु अन्यतमा अस्ति। इयं भाषा 'दैवीवाक्' इत्यनेनाभिधानेन सुप्रथिता अस्ति। यथा दण्डिनो वचनेन ज्ञायते - ''संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः।'' काव्यादर्शे 1/33

अस्यां भाषायां निबद्धं साहित्यं भृशं विपुलमस्ति। कलाविज्ञाने द्वे एवाधिकृत्य भाषायामस्यां सङ्ख्यातीताः ग्रन्थाः प्रणीताः। सर्वासां कलानां सर्वेषां विज्ञानानां च एकस्यामेव भाषायामनुशीलनाय दर्शनाय वा भाषेयमवश्यमेव पठनीया। या कला यज्ज्ञानम्वा संस्कृतभाषायामस्ति तदेव सर्वत्र विश्वस्य सर्वासु भाषासु वा अस्ति। या कला यज्ज्ञानम्वा संस्कृतभाषायां नास्ति तत् क्वचिन्नास्ति इति नार्थवादोऽपितु तथ्य वादोऽस्ति। सर्वेषां ज्ञानानां शिल्पानां सर्वासां विद्यानां सर्वासां कलानाञ्च संस्कृतभाषायामेकत्र कमनीयनिरुपणमस्ति। अत्र भौतिकाभ्युन्नतये प्रेयःशास्त्रम् आध्यात्मिकाभ्युन्नतये च श्रेयः शास्त्रमित्युभयविधशास्त्रं विरचितमस्ति। पराविद्या अपराविद्येत्युभयोर्विधयोः संस्कृतभाषायामेकत्र वर्णनमस्ति। अस्यां देववाण्यां मानवहृद्गत-सर्वेषां भावानां मञ्जुलाभिव्यक्तिर्दृश्यते। देववाण्यां विरचितं भावप्रवणसाहित्यं काव्यकोटिमधिरोहति। भावप्रवणकाव्येषु देवादिविषयकरतिभाव-निर्भरं काव्यसाहित्यं स्तोत्रकाव्यसाहित्यमित्यभिधीयते।

देववाण्यां स्तोत्रकाव्यप्रणयनस्य परमप्राचीनापरम्परा विद्यते। इयम्परम्परा इदानीम्यावदक्षुण्णा वर्तते। अत्र तथ्यमिदमवधेयं यत् समस्तपरवर्तीप्रवृत्तीनां मूलं वेदेषु उपलभ्यते। यथा भर्तृहरिवचनेनापि प्रमाणितम्भवति -

'आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः'। (वाक्यपदीये)

अतः स्तोत्रकाव्यस्यापि प्रेरणा वेदेभ्य एवं सम्प्राप्ता इति प्रतिभाति।

ऋग्वेदे विभिन्नदेवस्तुतिमूलका मन्त्राः सङ्गृहीताः। स्तुतिमूलकत्वादेते मन्त्राः स्तोत्रकाव्यस्थानीयाः। एवं संस्कृतसाहित्यस्य सर्वप्रथमं स्तोत्रकाव्यं ऋग्वेद एवास्ति। ऋग्वेदारब्धा स्तोत्रकाव्यप्रणयनस्येयं परम्परा विभिन्नदेवीदेवस्तुतीः क्रोडीकुर्वती विशालस्तोत्रसाहित्यं प्रास्तौत्। संस्कृतकाव्यसाहित्यस्य विविधविधासु स्तोत्रकाव्यविधा विशालतमं साहित्यं क्रोडीकरोति। मुक्तकशैल्यां विरचितमिदं स्तोत्रकाव्यसाहित्यं भक्तिभावनायाः प्राधान्यात् भक्तिकाव्यसाहित्यं स्तुतिमूलकतया स्तोत्रकाव्यसाहित्यं धार्मिकभावनासम्पृक्ततया च धार्मिककाव्यसाहित्यमिति नानाभिधानैरभिधीयते। समासेन संस्कृतस्तोत्रसाहित्यं प्राचीनं तथा विशालतया भावप्रवणतया च सर्वानन्यान् काव्यभेदान् अतिशेते।

संस्कृतस्तोत्रसाहित्यविभागः -

स्थूलरूपेण संस्कृतस्तोत्रसाहित्यं वैदिकवैदिकेतरभेदाभ्यां द्विधा भवति। अर्थात् प्रथमं वेदमूलकस्तोत्रसाहित्यमास्तिकस्तोत्र-साहित्यम् वा द्वितीयञ्च वैदिकेतरस्तोत्रकाव्यसाहित्यं नास्तिकस्तोत्रसाहित्यम्वा। आस्तिकस्तोत्र-साहित्यम्पुनः वैष्णवशैवशाक्तप्रकीर्णभेदैश्चतुर्धा भवति नास्तिकस्तोत्रसाहित्यञ्च जैनबौद्धभेदाभ्यां द्विधा भवति। एवं सम्पूर्ण स्तोत्रसाहित्यं षडुपभेदेषु विभक्तम्। तद्यथा -

1. वैष्णवस्तोत्रसाहित्यम्
2. शैवस्तोत्रसाहित्यम्
3. शाक्तस्तोत्रसाहित्यम्
4. प्रकीर्णस्तोत्रसाहित्यम्
5. जैनस्तोत्रसाहित्यम्
6. बौद्धस्तोत्रसाहित्यञ्च।

एते सर्वे स्तोत्रसाहित्यभेदाः समुदितरूपेण भक्तिकाव्यसाहित्यव्यपदेशेन व्यपदिश्यन्ते। अत्र एतेषां सर्वेषां स्तोत्रविभागानां साहित्यस्य समासेन विवरणं प्रस्तूयते।

वैष्णवस्तोत्रसाहित्यम् -

विष्णुस्तवनस्य परम्परा वैदिककालादेव प्रचलति। ऋग्वेदगतविष्णुसूक्ते विष्णुस्तुतिमूलकाः मन्त्राः सन्ति। पुराणसाहित्ये विष्णुविषयकाः विविधाः स्तुतयः प्राप्यन्ते। लौकिकसंस्कृतसाहित्ये स्तोत्रकाव्यानां यद्बाहुल्यं वैविध्यम्वा दृश्यते

तत्सर्वं पुराणसाहित्यमेवाश्रित्य प्रपञ्चितमस्ति। वस्तुतो विष्णोः विविधावतार-सम्बन्धीवृत्तमेव प्रस्तुतमस्ति पुराणेषु। एवमेव रामायणमहाभारतयोरपि विष्णुस्तवनस्य परम्परा अक्षुण्णा दृश्यते। परवर्तिकाले विष्णुस्तवनस्य स्वतन्त्रपरम्परा प्रचलिता जाता। अस्यां परम्परायां ये स्तोत्रग्रन्थाः प्रणीतास्तेषां समष्टिरेव वैष्णवस्तोत्रसाहित्यमित्यभिधीयते। एतत्साहित्यगतप्रधानसङ्ग्रहाणां विवरणमत्र प्रस्तूयते।

1. **मुकुन्दमालास्तोत्रम्-** अस्य स्तोत्रकाव्यस्य प्रणेता कुलशेखरोऽस्ति। वैष्णवस्तोत्रेषु स्तोत्रमिदं शिरोमणिरिवास्ति। स्तोत्रकाव्येऽस्मिन् द्विचत्वारिं-शदधिकत्रिशतपद्यानि सन्ति। सर्वत्र पद्येषु विष्णुविषयकरतिभावाभिव्यक्तिहेतोः भावध्वनिः विराजते। प्रणतिदैन्यशरणागति प्रभृतिविषयाः अत्र काव्यविषयीकृताः।

2. **आलवन्दारस्तोत्रम्-** इदं स्तोत्रं यामुनाचार्येण प्रणीतमस्ति। यामुनाचार्यस्य अपराभिधानमासीत् ''आलवन्दारः''। येनास्य स्तोत्रस्य 'आलवन्दारस्तोत्रमिति नाम प्रथितम्। प्रपत्तिप्रणतिनिवेदनात्मविस्मरण प्रभृतिविषयाः अत्र कमनीय-भाषायां वर्णितास्सन्ति। भावस्य भाषायाश्चेत्युभयोः मञ्जुलसमन्वयोऽत्र विहितोऽस्ति।

3. **कृष्णकर्णामृतस्तोत्रम्-** स्तोत्रकाव्यमिदं लीलाशुककविना प्रणीतमस्ति। काव्येऽस्मिन् कृष्णस्य विविधाः बाललीलाः कमनीयभाषायां निबद्धाः। कविः कृष्णं प्रियतमरूपेणोपासते। येनात्र माधुर्यभक्तिः विराजते। स्तोत्रस्यास्य द्विधा पाठः प्रचलितोऽस्ति। दक्षिणात्यपाठे त्रय आश्वासाः त्रिशतपद्यानि च सन्ति। बङ्गपाठे एक आश्वासः द्वादशोत्तरशतपद्यानि च सन्ति।

4. **पादुकासहस्रस्तोत्रम्-** अस्य स्तोत्रकाव्यस्य प्रणेता अनेकस्तोत्रकाव्यानां रचनाकाररूपे ख्यातो वेदान्तदेशिकोऽस्ति। भगवतः रङ्गनाथस्य पादुकायाः प्रशस्तौ निबद्धमिदं स्तोत्रं द्वात्रिंशतपद्धतिषु विभक्तमस्ति। अत्रत्यपद्यानि सरसानि भक्तिस्निग्धानि च सन्ति। अलङ्काराणामपि विनियोगोऽत्र समुचितरूपेण कृतोऽस्ति। वेदान्तदेशिकस्यान्यानि प्रमुखस्तोत्रकाव्यानि ईदृशि सन्ति।

वरदराजपञ्चाशत्स्तोत्रम्- इदं स्तोत्रं काञ्च्याः देवाधिदेवस्य वरदराजस्य स्तुत्यां विरचितमस्ति। अस्मिन् स्तोत्रे एकपञ्चाशत्पद्यानि सन्ति।

हयग्रीवस्तोत्रम् - भगवतः हयग्रीवस्य स्तुतौ निबद्धमिदं स्तोत्रं द्वात्रिंशत्पद्यानि क्रोडीकरोति।

अष्टभुजाष्टककाव्यम् - अष्टभुजाधारिणः भगवतः विष्णोः स्तुतौ प्रणीतमिदं स्तोत्रं द्व्यधिकशतपद्यानि क्रोडीकरोति।

अच्युतशतकम् - भगवतोऽच्युतस्य स्तुतौ निबद्धमिदं स्तोत्रकाव्यं प्राकृतभाषायां प्रणीताः द्व्यधिकशतगाथाः क्रोडीकरोति।

यतिराजसप्ततिः - रामानुजस्वामिनः स्तुत्यां निबद्धमिदं स्तोत्रकाव्यं चतुस्सप्ततिपद्यानि दधाति।

दयाशतकम् - स्तोत्रकाव्येऽस्मिन् भगवतः श्रीनिवासस्य दयासम्बन्धिस्तुतयो निबद्धाः सन्ति।

गोदास्तुतिः - अस्मिन् स्तोत्रकाव्ये एकोनत्रिंशत्पद्येषु आण्डालस्य स्तवनं कृतमस्ति।

गरुडपञ्चाशत्स्तोत्रम् - द्विपञ्चाशत्पद्यात्मके स्तोत्रेऽस्मिन् गरुडस्य स्तुतयो निबद्धाः सन्ति। एवमेवान्यान्यपि कानिचित् स्तोत्राणि सन्ति वेदान्तदेशिकविरचितानि।

5. **लक्ष्मीसहस्रस्तोत्रम् -** भगवत्याः लक्ष्म्याः स्तुतौ निबद्धमिदं स्तोत्रकाव्यमेकसहस्रपद्यानि क्रोडीकरोति। अत्र भगवत्याः प्रत्यङ्गवर्णनं कृतमस्ति। अत्रालङ्काराणां विनियोगः भावानां वैभवः भाषायाश्चमत्कारश्चावलोकनीयाः। एवं सर्वाभिः दृष्टिभिः कमनीयमिदं स्तोत्रकाव्यम्।

6. **रामशतकम् -** विष्ण्ववतारिणो रामस्य वृत्तमधिकृत्य प्रणीतमिदं स्तोत्रशतकं सोमेश्वरस्य रचना अस्ति। इदं स्तोत्रमतिस्वाभाविकशैल्यां विरचितमस्ति। भक्तिभावभरितमिदं काव्यं स्रग्धराछन्दसि निबद्धमस्ति। अत्रत्यपद्यानि कमनीयकाव्यलक्षणोपेतानि सन्ति।

7. **रामभद्रदीक्षितस्य स्तोत्रकाव्यानि -** रामभद्रदीक्षितेनानेकस्तोत्रकाव्यानि प्रणीतानि। अनेन भगवतो रामस्य तस्य बाणचापयोश्च स्तुतौ पञ्चकाव्यानि विरचितानि। तानि च 1. रामचापस्तवः 2. रामबाणस्तवः 3. विश्वगर्भस्तवः 4. वर्णमालास्तोत्रम् 5. रामाष्टप्रासश्च। प्रथमे स्तोत्रे एकादशोत्तरशतपद्येषु रामचापस्य स्तुतिरस्ति। अत्र वीरभावानुप्राणिता भक्तिः प्रदर्शिता अस्ति। द्वितीये शार्दूलविक्रीडितच्छन्दसि निबद्धे अष्टोत्तरशतपद्यात्मके स्तोत्रे रामबाणस्य वर्णनमस्ति। अत्रापि वीरानुप्राणिताभक्तिः व्यञ्जिता भवति। तृतीयस्य विश्वगर्भस्तवाख्यस्य स्तोत्रस्य 'जानकीजानिस्तोत्रमिति' नाम अपि प्रथितमस्ति। अत्र पञ्चविंशत्यधिकशतपद्यानि सन्ति येषु रामस्य विविधाः स्तुतयो निबद्धाः

सन्ति। इदं स्तोत्रं मञ्जुलभावभरितमस्ति। चतुर्थं वर्णमालास्तोत्रं वर्णमालायाः अक्षरक्रमेण रचितमस्ति। येनास्य वर्णमालास्तोत्रम् इति नाम समीचीनमस्ति। अस्मिन् स्तोत्रे पञ्चाशत्पद्यानि सन्ति येषु भगवतो रामस्य विविधाः स्तुतयः रसपेशलतया सहृदयहृदयावर्जनं कुर्वन्ति। पञ्चमं रामाष्टप्रासस्तोत्रं विचित्रंमार्गस्य निदर्शनमस्ति। स्तोत्रपद्येषु अष्टप्रास (अष्टानुप्रास) सद्भावहेतोः 'रामाष्टप्रास' इत्यभिधानं सर्वथा समुचितम्प्रतिभाति। अस्मिन् स्तोत्रे शार्दूलविक्रीडितच्छन्दसि निबद्धानि षोडशोत्तरशतपद्यानि सन्ति।

8. **सुदर्शनशतकम्** - इदं स्तोत्रं कूरनारायणस्य रचना अस्ति। अस्य रचना स्रग्धराछन्दसि कृता अस्ति। अत्र सुदर्शनचक्रस्य कवित्वमयीस्तुतिरस्ति। भाषायाम्प्रौढिः भावस्य च ओजस्विता उल्लेखनीये स्तः।

9. **जानकीचरणचामरस्तोत्रम्** - श्रीनिवासाचार्यप्रणीतं जानकीचरणचामरस्तोत्रमलङ्कृतशैल्याः प्रौढकाव्यमस्ति। अस्मिन् स्तोत्रे शिखरिणीछन्दसि निबद्धानि एकादशोत्तरशतपद्यानि सन्ति। अत्र भगवत्याः सीतायाः चरणयोः प्रशस्तस्तुतिः प्रस्तुता अस्ति।

10. **आनन्दमन्दाकिनीस्तोत्रम्** - मधुसूदनसरस्वतीप्रणीतमिदं स्तोत्रं भगवतो विष्णोः स्वरूपस्य प्रशस्तिपरं स्निग्धवर्णनं प्रस्तौति। अस्मिन् स्तोत्रे द्वयधिकशतपद्यानि सन्ति। काव्येऽस्मिन् भक्तिभावस्य पदेपदे सहजा अभिव्यक्तिर्भवति। भाषायाः लालित्यं माधुर्यगुणोद्दीपने शक्तं दृश्यते।

11. **दानलीलास्तोत्रम्**- माधवभट्टस्य स्तोत्रमिदं दानलीलामधिकृत्य लिखितमस्ति। अष्टचत्वारिंशत्पद्यात्मकं रुचिरभाषायां विरचितमस्ति।

12. **नारायणीयकाव्यम्** - नारायणभट्टविरचितं स्तोत्रमिदं मुख्यतया कृष्णस्तुतिं प्रस्तौति। स्तुतिमुखेन समस्तकृष्णचरितम् वर्णितमस्ति। अस्मिन स्तोत्रे षड्त्रिंशदधिकसहस्रपद्यानि सन्ति। प्रसादगुणोपेतं काव्यमिदं सरलभाषायां निबद्धमस्ति।

13. **वरदराजस्तवः** - वेदान्तदेशिकस्य 'वरदराजपञ्चाशत्स्तात्रेण प्रभावितो भूत्वा अप्पयदीक्षितः वरदराजस्तवाख्यं स्तोत्रं प्रणीतवान्। अस्मिन् स्तोत्रे काञ्च्याः भगवतो वरदराजस्य स्तुतयो निबद्धाः। षडुत्तरशतपद्यात्मके काव्येऽस्मिन् कमनीयभाषायां भगवतः स्वरूपं वर्णितमस्ति।

14. करुणालहरीस्तोत्रम् - पण्डितराजजगन्नाथविरचितमिदं स्तोत्रं भगवतश्चरणारविन्दयोः प्रणतिपराणि पद्यानि क्रोडीकरोति। स्तोत्रेऽस्मिन् षष्टिपद्यानि सन्ति। भाषाभावोभयदृष्टिभ्यां काव्यमिदं प्रकृष्टमस्ति।

15. लक्ष्मीलहरीस्तोत्रम् - इदं स्तोत्रमपि पण्डितराजजगन्नाथ विरचितमस्ति। अत्र एकचत्वारिंशत्पद्येषु शिखरिणीछन्दोबद्धेषु भगवत्याः लक्ष्म्याः विविधाः स्तुतयः प्रणीताः सन्ति।

16. शङ्कराचार्यस्य स्तोत्राणि - शङ्कराचार्यरचितानि अनेकानि वैष्णवस्तोत्राणि प्रथितानि सन्ति। तद्यथा-द्वाविंशतिपद्यात्मकं कामभुजङ्गप्रयातस्तोत्रम् चतुर्दशपद्यात्मकं विष्णुभुजङ्गप्रयातस्तोत्रम् द्विपञ्चाशत्पद्यात्मकं विष्णुपादादिकेशान्तवर्णनस्तोत्रम् अष्ट पद्यात्मकं पाण्डुरङ्गाष्टकस्तोत्रम् अष्टपद्यात्मकमच्युताष्टकस्तोत्रम् अष्टपद्यात्मकं कृष्णाष्टकस्तोत्रम् त्रिचत्वारिंशत्पद्यात्मकं हरमीडेस्तोत्रम् अष्टपद्यात्मकं गोविन्दाष्टकस्तोत्रम् सप्तदशपद्यात्मकं भगवन्मानसपूजास्तोत्रम् अष्टपद्यात्मकं जगन्नाथाष्टकस्तोत्रम् पञ्चपद्यात्मकं लक्ष्मीनृसिंहपञ्चरत्नस्तोत्रम् सप्तदशपद्यात्मकं लक्ष्मीनृसिंहकरुणारस स्तोत्रञ्च। एतेषां सर्वेषां स्तोत्राणां भाषा सहजा ललिता प्रसादगुणोपेता चास्ति। सर्वत्र भक्तिभावस्य प्रबलतया अभिव्यक्तिर्दृश्यते। एताः सर्वाः रचनाः आदिशङ्कराचार्यस्य उताहो कस्यचिदन्यशङ्कराचार्यस्य इति न निर्विवादसिद्धं तथ्यम्। तथापि काव्यात्मकसौन्दर्यदृष्ट्या एतानि भक्तिकाव्यानि ललितानि सन्ति। वैष्णवस्तोत्रकाव्येषु प्रथितानां स्तोत्राणामेवोल्लेखोऽत्र कृतोऽस्ति। येनोपरिनिर्दिष्टस्तोत्रातिरिक्तमपि कानिचित् स्तोत्रकाव्यानि उपलभ्यन्ते। बहूनि स्तोत्रकाव्यानि अप्रकाशितानि यत्र तत्र पुस्तकालयेषु हस्तलिखितप्रतिषु वर्तन्ते। वाराणसीस्थसरस्वतीभवनपुस्तकालये विद्यमानानां स्तोत्राणां विवरणं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयप्रकाशितायाः विवरणपञ्जिकायाः पञ्चमभागस्य प्रथमद्वितीयखण्डयोर्विद्यते।

शैवस्तोत्रसाहित्यम् - विष्णुस्तवनपरम्परेव शिवस्तवनपरम्परा अपि वैदिककालादेव प्रचलति। ऋग्वेदगतरुद्रसूक्ते रुद्रस्तुतिमूलका मन्त्राः सन्ति। पौराणिकसाहित्येऽपि शिवस्तवनस्य परम्परा दृश्यते। परवर्तिकाले शिवस्तवनस्य पृथक्परम्परायां जातायां बहूनि शिवस्तोत्राणि विरचितानि सन्ति। अस्यां परम्परायां

ये स्तोत्रग्रन्थाः प्रणीताः तेषां समुदायः एव शैवस्तोत्रसाहित्यमित्यभिधीयते। एतत्साहित्यगतप्रधानस्तोत्राणां विवरणमत्र प्रस्तूयते।

1. **शिवमहिम्नस्तोत्रम् -** शिवस्तोत्रेषु स्तोत्रमिदं प्राचीनतममतिप्रख्या तञ्चारित। अस्य प्रणेतृविषये विसंवादो दृश्यते। केचन विद्वांसः इयं पुष्यदन्तस्य रचना इति स्वीकुर्वन्ति केचन च कुमारिलभट्टस्य। स्तोत्रेऽस्मिन् चत्वारिंशत्पद्यानि प्राप्यन्ते। परन्तु तेषु द्वात्रिंशत्पद्यानामेव मौलिकता स्वीक्रियते विद्वद्भिः। स्तोत्रगतपद्यानि कमनीयतया सहृदयहृदयावर्जने पूर्णशक्तानि। अस्य स्तोत्रस्य विषये इयमुक्तिः प्रथिता अस्ति - 'महेशान्नापरो देवो महिम्नो नापरा स्तुतिः।''

2. **परशम्भुमहिम्नस्तवः -** स्तोत्रमिदं दुर्वाससो मुनेः रचना मन्यते। त्रयोदशप्रकरणेषु विभक्तमिदं स्तोत्रं गम्भीरार्थप्रकाशकं तान्त्रिकतथ्यबहुलञ्च अस्ति। काव्यात्मकवैशिष्ट्यदृष्ट्या स्तोत्रमिदं नातिमहत्त्वपूर्णम्।

3. **शिवस्तुतिः -** दशपद्यात्मकं स्तोत्रमिदं लङ्केश्वरकवेः रचना अस्ति। पद्यानां साहित्यिकसौन्दर्यं प्रकृष्टमस्ति।

4. **शङ्कराचार्यस्य स्तोत्राणि -** शिवस्तोत्रकारेषु शङ्कराचार्यस्य महत्त्वपूर्णस्थानमस्ति। अस्य स्तोत्रेषु एते द्वे स्तोत्रे महत्वपूर्णे स्तः -

शिवपादादिकेशान्तवर्णनस्तोत्रम् - अस्य स्तोत्रस्य पद्यानि स्रग्धराछन्दसि निबद्धानि सन्ति। एकचत्वारिंशत्पद्येषु निबद्धमिदं स्तोत्रं शिवस्य प्रत्यङ्गवर्णनं प्रस्तौति।

शिवकेशादिपादान्तवर्णनस्तोत्रम् - अस्मिन् स्तोत्रेऽपि शिवस्य प्रत्यङ्गवर्णनमस्ति। अत्र एकोनत्रिंरात्पद्यानि सन्ति। अत्रत्यपद्यान्यपि स्रग्धराछन्दसि निबद्धानि सन्ति। भाषाभावेत्युभयदृष्टिभ्यां शङ्करस्य पद्यानि कमनीयानि सन्ति। एवमन्यान्यपि बहूनि शिवसतोत्राणि शङ्कराचार्यप्रणीतानि प्रथितानि। तद्यथा-चत्वारिंशत्पद्यात्मकं शिवभुजङ्गस्तोत्रम् शतपद्यामकं शिवानन्दलहरीस्तोत्रम् द्वादशोत्तरशतपद्यात्मकं वेदसारशिवस्तोत्रम् द्विपञ्चाशदधिकशतपद्यात्मकं शिवापराधक्षमापनस्तोत्रम् पञ्चाशत्पद्यात्मिका सुवर्णमालास्तुतिः पञ्चत्रिंशत्पद्यात्मकं दक्षिणामूर्तिवर्णमालास्तोत्रम् दशपद्यात्मकं दक्षिणामूर्त्यष्टकस्तोत्रम् षड्चत्वारिंशत्पद्यात्मकं मृत्युञ्जयमानसिकपूजास्तोत्रम नवपद्यात्मकं शिवनामावल्यष्टकस्तोत्रम् पञ्चपद्यात्मकं शिवपञ्चाक्षरस्तोत्रम् त्रयोदशपद्यात्मकम् उमामहेश्वरस्तोत्रम् एकोनविंशतिपद्यात्मकं दक्षिणामूर्तिस्तोत्रम् अष्टपद्यात्मकं

कालभैरवाष्टकस्तोत्रम् अष्टाविंशतिपद्यात्मकं शिवपञ्चाक्षरनक्षत्रमालास्तोत्रम् द्वादशपद्यात्मकं द्वादशलिङ्गस्तोत्रम् दशपद्यात्मिका दशश्लोकीस्तुतिः नवपद्यात्मकमर्द्धनारीश्वरस्तोत्रञ्च। एतानि सर्वाणि स्तोत्राणि आदिशङ्कराचार्यस्य उताहो कस्यचिदन्यस्य इत्यस्मिन् विषये विसंवादोऽस्ति। तथापि काव्यात्मकसौन्दर्यदृष्ट्या एतानि स्तोत्रकाव्यानि कमनीयानि सन्ति।

5. **शिवस्तोत्रावली** - उत्पलदेवविरचितमिदं स्तोत्रं शैवस्तोत्रेषु अन्यतमं स्थानं दधाति। अत्र एकविंशतिस्तोत्राणां सङ्ग्रहः कृतोऽस्ति। सर्वेषु स्त्रोतेषु भगवतः शङ्करस्यागणितगुणाः रुचिरभाषायां गीताः।

6. **अभिनवगुप्तस्य स्तोत्राणि** - अभिनवगुप्तः बहूनि शिवस्तोत्रकाव्यानि विरचितवान्। तेषु कानिचित्प्राप्यानि कानिचिच्चाप्राप्यानि सन्ति। एतानि सर्वाणि क्रमस्तोत्रदेहस्थदेवताचक्रस्तोत्रभैरवस्तोत्रदेवीस्तोत्रविवरणशिवशक्त्यविना-भावस्तोत्रप्रकरणस्तोत्राणि सन्ति। सरसपदसमाश्रयेण गभीरभावसम्प्रेषणं वर्तते प्रधानवैशिष्ट्यमेतेषां स्तोत्राणाम्।

7. **अर्द्धनारीश्वरस्तोत्रम्** - इदं स्तोत्रं कल्हणेन प्रणीतमस्ति। अत्र अष्टादशपद्यानि सन्ति। एतेषु पद्येषु उमाशङ्करयोः सम्पृक्तविग्रहस्य रमणीय-वर्णनमस्ति।

8. **दीनाक्रन्दनस्तोत्रम्** - लोष्टककविप्रणीतमिदं स्तोत्रं चतुःपञ्चाशत्पद्यानि क्रोडीकरोति। स्तोत्रेऽस्मिन् भगवतो विश्वनाथस्य स्तुतयो निबद्धाः सन्ति। स्तोत्रगतपद्येषु दीनतायाः अभिव्यक्तिः सरसभाषायां कृता अस्ति।

9. **स्तुतिकुसुमाञ्जलिः** - अयं ग्रन्थः अष्टात्रिंशत्स्तोत्राणां सङ्ग्रहोऽस्ति। एतेषां स्तोत्राणां प्रणेता जगद्धरभट्टोऽस्ति। सम्पूर्णसङ्ग्रहे पञ्चदशोत्तरचतुर्दश-शतपद्यानि सन्ति। करुणरसाप्लुतानि पद्यानि सहृदय हृदयाह्लादने पूर्णशक्तानि। स्तोत्रेऽस्मिन् कलापक्षभावपक्षेत्युभयोः परिपाकः दृश्यते। एतस्मादेव कारणात् शिवस्तोत्रेषु अस्य महत्वपूर्णं स्थानमस्ति। अत्र सर्वत्रात्मनिवेदनस्य प्राधान्यं प्राप्यते।

10. **ईश्वरशतकम्** - इदं स्तोत्रमवतारकवेः रचना अस्ति। स्तोत्रगतपद्यानि चित्रकाव्यस्य वैशिष्ट्यं दधति। एवं विचित्रमार्गसमाश्रयेण रचितानि पद्यानि क्लिष्टानि जातानि तथापि भक्तिभावप्रेषणदृष्ट्या स्तोत्रमिदं महत्त्वपूर्णमस्ति।

11. **शिवशतकम्** - गोकुलनाथप्रणीतमिदं स्तोत्रं शिवस्तुतौ निबद्धानि शतपद्यानि क्रोडीकरोति।

12. **शिवस्तुतिः** - नारायणपण्डितस्य रचनेयं त्रयोदशपद्यानि क्रोडीकरोति। एतेषु पद्येषु ललितभाषायां शिवस्य स्तुतयः विबद्धाः सन्ति।

शाक्तस्तोत्रसाहित्यम् - शक्तिस्तवनस्य परम्परा वैदिककालादेव प्रचलति। ऋग्वेदगतोषस्सूक्तेषु वाक्सूक्तेषु अन्येषु चैवंविधसूक्तेषु शक्तिस्तवनस्य मूलं प्राप्यते। वस्तुतः प्रकृतिपूजनेन शक्तिस्तवनपरिपाटी प्राचालीत्। परवर्तिकाले शक्त्यधिष्ठातृदेवतायाः स्तवनस्य स्वतन्त्रपरम्परा प्रचलिता अभूत् सायणेन शक्तिस्थानीयाः अभिमानिदेवताः स्वीकृताः तद्यथा तेनोक्तम्-

'ओषध्यादिमन्त्रेषु अपि चेतना एत तत्तदभिमानिदेवताः तेन तेन नाम्ना सम्बोध्यन्ते' ऋग्वेदभाष्यभूमिकायाम् इदमेव तथ्यं भगवता बादरायणेन सूत्रेऽमुस्मिन् सङ्केतितम् -

'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्। ब्रह्मसूत्रे 2।1।5

शक्त्यधिष्ठातृदेवतानां विविधतया परवर्तिकाले विविधाभिधानाभिहिताः शक्तयः स्तुत्या अभवन्। चण्डीदेवीत्रिपुरसुन्दरीलक्ष्मीप्रभृत्यभिधानैः सा शक्तिः पुराणतन्त्रशाक्तोपनिषत्शाक्तस्तोत्रेषु स्तूयते। संस्कृतसाहित्ये शाक्तस्तोत्राणांमतिसमुन्नता परम्परा दृश्यते। अस्यां परम्परायां प्रतिनिधिभूतानि स्तोत्राणि अत्र प्रस्तूयन्ते।

1. **चण्डीशतकम्** - महाकविबाणभट्टेन विरचितमिदं स्तोत्रं शाक्तस्तोत्रेषु महनीयस्थानं भजते। स्रग्धरावृत्ते निबद्धं स्तोत्रमिदं भगवत्याः दुर्गायाः भव्यस्तुतिं प्रस्तौति। अलङ्काराणां प्राधान्यात् काव्यमिदमलङ्कृतमार्गस्य रचना कथ्यते। भावपक्षापेक्षया अत्र भाषापक्षस्य कलापक्षस्य वा प्राधान्यं दृश्यते।

2. **देवीशतकम्** - ध्वनिप्रस्थानप्रतिष्ठापकेन आनन्दवर्धनेन विरचितमिदं स्तोत्रं चित्रशैल्यां निबद्धमस्ति। अत्र नानाबन्धनिबन्धने दत्तचितः दृश्यते आनन्दवर्धनः। शब्दचमत्कारस्य प्राधान्यं सर्वत्र विराजते। तथापि भक्तिभावनायाः प्रबलतया स्तोत्रेषु अस्य विशिष्टमहत्त्वमस्ति।

3. **सुभगोदयस्तुतिः** - गौडपादाचार्यस्य रचनेयं तान्त्रिकतथ्यबहुला अस्ति। अत्र शिखरिणीवृत्ते निबद्धानि द्विपञ्चाशत्पद्यानि सन्ति। काव्यात्मकचमत्कारोऽत्र प्रतिपद्यं विराजते।

4. **शङ्कराचार्यस्य स्तोत्रणि -** शङ्कराचार्यस्य बहूनि स्तोत्रणि सन्ति येषु भगवत्याः त्रिपुरसुन्दर्याः स्तवनमस्ति। तेषु प्रमुखाणि स्तोत्राणि इयन्ति सन्ति - अष्टाविंशत्यधिकशतपद्यात्मकं भगवत्याः मानसपूजावर्णनपरं त्रिपुरसुन्दरी-मानसिकोपचारपूजास्तोत्रम् त्रिसप्ततिपद्यात्मकं भगवत्याः मानसिकोपचार पूजावर्णनपरं चतुष्षष्ट्युपचारमानसपूजास्तोत्रम् शतपद्यात्मकं भगवत्याः दिव्यसौन्दर्यवर्णनपरं शिखरिणीवृत्ते निबद्धं शङ्कराचार्यस्य सर्वोत्कृष्टं स्तोत्रम् सौन्दर्यलहरीस्तोत्रम् अष्टपद्यात्मकमलङ्कृतशैल्यां रचितमम्बाष्टकस्तोत्रम् अष्टाविंशतिपद्यात्मकं देवीभुजङ्गस्तोत्रम् विंशतिपद्यात्मकमानन्दलहरीस्त्रोतम् दशोत्तरशतपद्यात्मकं त्रिपुरसुन्दरीवेदपादस्तोत्रम् अष्टपद्यात्मकं त्रिपुरसुन्दर्यष्टकस्तोत्रम् षड्पद्यात्मकं ललितापञ्चरत्नस्तोत्रम् षोडशपद्यात्मकं कल्याणवृष्टिस्तोत्रम् दशपद्यात्मकं नवरत्नमालिकास्तोत्रम् सप्तदशपद्यात्मकं मन्त्रमातृकापुष्पमालास्तोत्रम् एकादशपद्यात्मकं गौरीदशकस्तोत्रम् सप्तदशपद्यात्मकं भवानीभुजङ्गस्तोत्रम् द्वादशपद्यात्मकमन्नपूर्णाष्टकस्तोत्रम् पञ्चपद्यात्मकं मीनाक्षीपञ्चरत्नस्तोत्रम् अष्टपद्यात्मकं मीनाक्षीस्तोत्रम् अष्टपद्यात्मकं भ्रमराम्बाष्टकस्तोत्रम् षष्टपद्यात्मकं शारदाभुजङ्गप्रयाताष्टकस्तोत्रम् च।

5. **ललितास्तवरत्नस्तोत्रम् -** स्तोत्रमिदं दुर्वाससः रचना अस्ति। अत्र आर्यावृत्तनिबद्धानि त्रयोदशाधिकद्विशतपद्यानि सन्ति।

6. **त्रिपुरसुन्दरीमहिम्नस्तोत्रम् -** इदं स्तोत्रमपि दुर्वाससः रचना अस्ति। अस्मिन् स्तोत्रे स्तुति वृत्तनिबद्धानि अष्टपञ्चाशत्पद्यानि सन्ति।

7. **पञ्चस्तवी -** स्तोत्रसङ्ग्रहेऽस्मिन् पञ्चस्तोत्राणि सन्ति। एतानि कालिदासाख्येन केनचित् कविना प्रणीतानि सन्ति। पञ्चस्तवीगतपञ्चस्तोत्रेषु एकविंशतिपद्यात्मिका लघुस्तुतिः एकविंशतिपद्यात्मकः घटस्तवः त्रयोविंशति-पद्यात्मिका चर्चास्तुतिः द्वात्रिंशत्पद्यात्मिका आबास्तुतिः पञ्चत्रिंशत् पद्यात्मकश्च सकलजननीस्तवः सन्ति। एतानि सर्वाणि स्तोत्राणि भाषाभावोभाभ्यां दृष्टिभ्यां सौन्दर्यपूर्णानि। केचन विद्वांसः एतानि शङ्कराचार्यप्रणीतानि इति स्वीकुर्वते।

8. **श्यामलादण्डकस्तोत्रम् -** इयं रचना कालिदासनाम्नः कस्यचित् कवेरस्ति। अत्र पञ्चदण्डकाः सन्ति येषु मातङ्गीदेव्याः रम्यस्तवनं कृतमस्ति। अत्रत्यपद्यानां साहित्यिकसौन्दर्यमुत्कृष्टमस्ति।

9. **मूकपञ्चशती** - अयं सङ्ग्रहः मूककवेः रचना अस्ति। अस्मिन् सङ्ग्रहे विविधवर्ण्यविषयवन्ति पञ्चशतकानि सन्ति। तानि कटाक्षशतकम् मन्दस्मितशतकम्, पादारविन्दशतकम्, आर्याशतकम्, स्तुतिशतकञ्च। एतेषु सर्वेषु शतकेषु काञ्च्याः मीनाक्षीदेव्याः यथानामवर्णनं कृतमस्ति। अत्राभिनवकल्पनायाः वैपुल्यं काव्यात्मकसौन्दर्यं वर्धयति।

10. **त्रिपुरसुन्दरीमानसपूजास्तोत्रम्-** इदं स्तोत्रं सामराजदीक्षितेन प्रणीतमस्ति। शङ्कराचार्यस्य स्तोत्रमनुसृत्य रचितमिदं स्तोत्रं कमनीयकाव्यवैशिष्ट्यविशिष्टमस्ति।

11. **गीतिशतकम्-** इदं स्तोत्रं सुन्दराचार्यारूपकविना विरचितमस्ति। आर्यावृत्ते निबद्धानि पद्यानि काव्यात्मकसौन्दर्योपेतानि सन्ति।

12. **आनन्दसागरस्तवः** - इदं स्तोत्रं नीलकण्ठदीक्षितेन विरचितमस्ति। अत्रत्यपद्यानि सरसानि सन्ति। भक्तिभावनायाः व्यञ्जनायां कवेः भाषा शक्ता अस्ति।

13. **चण्डीकुचपञ्चाशिका** - इदं स्तोत्रं लक्ष्मणकवेः रचना अस्ति। अत्र चण्डीकुचवर्णनं पञ्चाश्त्पद्येषु कृतमस्ति। स्तोत्रेऽस्मिन् उक्तिवैचित्र्यस्य प्राधान्यमस्ति।

14. **महाराज्ञीस्तात्रम्** - इदं स्तोत्रं कृष्णकपण्डितस्य रचना अस्ति। स्तोत्रेऽस्मिन् एकोनषष्टिपद्यानि सन्ति। अत्र भगवत्याः महाराज्ञाः स्तवनं कृतमस्ति। सर्वत्र पद्येषु भावपक्षस्य प्राधान्यमस्ति।

15. **आनन्दमन्दिरस्तोत्रम्** - लल्लादीक्षितप्रणीतमिदं स्तोत्रं शतपद्यानि क्रोडीकरोति। अस्मिन् स्तोत्रे संकटादेव्याः स्तुतयः निबद्धाः सन्ति। अत्रत्यानि पद्यानि प्रसादगुणोपेतानि भक्तिभावभरितानि च सन्ति।

प्रकीर्णस्तोत्रसाहित्यम् - सूर्यादिदेवानधिकृत्य प्रणीतानि स्तोत्राणि प्रकीर्णस्तोत्र-साहित्ये गृह्यन्ते। एवमेवानेकस्तोत्रकाव्यानि गङ्गाप्रभृतिनदीः अधिकृत्य रचितानि सन्ति। अन्यानि कानिचित् स्तोत्राण्यपि प्राप्यन्ते। एतेषां विवरणमत्र समासेन प्रस्तूयते -

1. **सूर्यशतकम्** - मयूरभट्टविरचितं सूर्यशतकाख्यं स्तोत्रं संस्कृत स्तोत्रकाव्येषु महनीयं स्थानं भजते। कलापक्षस्य प्राधान्येऽपि अत्र भावपक्षस्य सम्यगभिव्यञ्जना भवति। अत्रालङ्काराणां प्राचुर्येण विनियोगो विहितोऽस्ति। अत्रत्यानि पद्यानि स्रग्धरावृत्तनिबद्धानि सन्ति।

2. **सूर्यशतकम्** - इदं शतकं गोपालशर्मणा प्रणीतमस्ति। शतपद्यात्मके स्तोत्रेऽस्मिन् सूर्यस्य विविधाः स्तुतयो निबद्धाः सन्ति।

3. **सूर्यशतकम्** - अप्रकाशितमिदं स्तोत्रकाव्यं श्रीश्वरविद्यालङ्काराख्यकवेः रचना अस्ति। शतकेऽस्मिन् सूर्यस्य बहुविधाः स्तुतयो निबद्धाः सन्ति।

4. **सूर्यशतकम्** - इदं स्तोत्रमप्यप्रकाशितमस्ति। अस्य प्रणेता अस्ति राघवेन्द्रसरस्वतीप्रख्यः कश्चित् कविः। अत्रत्यपद्येषु सूर्यस्य विविधाः स्तुतयो निबद्धाः सन्ति।

5. **सुधालहरी** - पण्डितराजजगन्नाथविरचितमिदं स्तोत्रं सूर्यस्तवनं प्रस्तौति। स्तोत्रेऽस्मिन् स्रग्धरावृत्ते निबद्धानि त्रिंशत्पद्यानि सन्ति। अत्र प्रौढभाषायां भगवतः सूर्यस्य स्तुतयः विहिताः सन्ति।

6. **भास्करभावभानवः** - इदं स्तोत्रं डॉ. कालिकाप्रसादशुक्लस्य रचना अस्ति। अत्र सहजभाषायां सूर्यस्तुत्यां कमनीयभावाः अभिव्यञ्जिताः सन्ति।

7. **नर्मदाष्टकस्तोत्रम्** - नर्मदायाः स्तुत्यां लिखितमिदं स्तोत्रमपि शङ्कराचार्यस्यः रचना अस्ति।

8. **गङ्गाष्टकस्तोत्रम्** - गङ्गायाः स्तुतौ प्रणीतमिदं स्तोत्रमपि शङ्कराचार्यस्य रचना अस्ति।

9. **यमुनाष्टकस्तोत्रम्** - इदं स्तोत्रमपि शङ्कराचार्याख्यकवेः रचना अस्ति। अत्र यमुनायाः कमनीयास्तुतिः कृता अस्ति।

10. **गङ्गालहरी** - इदं स्तोत्रं पण्डितराजजगन्नाथस्य कृतिरस्ति। अत्र शिखरिणीवृत्तनिबद्धेषु द्विपञ्चाशत्पद्येषु भगवत्याः भागीरथ्याः रमणीयाः स्तुतयः निबद्धाः सन्ति।

11. **अमृतलहरी** - इदं स्तोत्रमपि पण्डितराजजगन्नाथस्य रचना अस्ति। अत्र दशपद्येषु यमुनायाः स्तुतयो निबद्धाः सन्ति।

12. **मणिकर्णिकाष्टकस्तोत्रम्** - स्तोत्रमिदं मर्णिकर्णिकायाः स्तुतौ निबद्धमस्ति।

13. **काशीपञ्चकस्तोत्रम्** - काशीस्तवनमधिकृत्य स्तोत्रमिदं प्रणीतम्।

14. **हनुमत्पञ्चरत्नस्तोत्रम्** - षड्पद्यात्मके स्तोत्रेऽस्मिन् हनुमतः स्तुतयो निबद्धाः सन्ति।

15. **प्रातःस्मरणस्तोत्रम् -** इदं पद्यचतुष्टयात्मकं स्तोत्रमस्ति।

16. **सुब्रह्मण्यभुजङ्गस्तोत्रम् -** इदं त्रयस्त्रिंशत्पद्यात्मकं स्तोत्रमस्ति।

17. **गुर्वष्टकस्तोत्रम् -** इदं नवपद्यात्मकं स्तोत्रमस्ति।

18. **चर्पटमञ्जरिकास्तोत्रम् -** इदं सप्तदशपद्यात्मकं गोविन्दभजनात्मक-स्तोत्रमस्ति।

एवमेवान्ये बहवो देवाः, येषां स्तुतिमधिकृत्य स्तोत्रकाव्यानि विरचितानि। तद्यथा- अन्नपूर्णाविषयकस्तोत्राणि इन्द्राक्षीस्तोत्राणि कर्पूरस्तोत्राणि कार्त्तवीर्यस्तोत्राणि कृष्णस्तोत्राणि गणेशस्तोत्राणि गायत्रीस्तोत्राणि गुरुस्तोत्राणि, गोपालस्तोत्राणि गोरक्षस्तोत्राणि नृसिंहस्तोत्राणि, बटुकभैरवस्तोत्राणि, राधास्तोत्राणि रामस्तोत्राणि रेणुकास्तोत्राणि लक्ष्मीस्तोत्राणि सरस्वतीस्तोत्राणि च। एतेषामन्येषां च स्तोत्राणां विवरणं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य हस्तलिखितग्रन्थानां विवरणपञ्जिकायाः पञ्चमे भागे विद्यते।

जैनस्तोत्रसाहित्यम् - आस्तिकनास्तिकभेदाभ्यां पूर्वं स्तोत्रसाहित्यं द्विधोपविभक्तम्। तत्र नास्तिकस्तोत्रसाहित्ये जैनस्तोत्रकाव्यानां बौद्धस्तोत्रकाव्यानाञ्च परिगणनं क्रियते। बहवः जैनकवयः संस्कृतभाषायां स्तोत्रकाव्यानि विरचितवन्तः। एतेषु स्तोत्रेषु जैनतीर्थङ्कराणाां भक्तिरसनिर्भराः स्तुतयः निबद्धाः सन्ति। आत्मनिवेदनोपेतभक्तिभावाभिव्यञ्जने जैनस्तोत्रकाराः निपुणाः सन्ति। एतेषां जैनस्तोत्राणां संक्षिप्तविवरणमत्र प्रस्तूयते।

1. **समन्तभद्रस्य स्तोत्राणि -** समन्तभद्रेण जिनस्तुत्यां बहूनि स्तोत्राणि विरचितानि। वस्तुतः सर्वप्रथमं संस्कृतभाषायां समन्तभद्रः एव स्तोत्राणि विरचितवान्। तस्य चत्वारि स्तोत्रकाव्यानि प्रथितानि सन्ति। त्रिचत्वारिंशदधिकशतपद्यात्मके स्वयम्भूस्तोत्रे चतुर्विंशतितीर्थङ्कराणां स्तुतयो निबद्धाः सन्ति। सर्वत्र पद्येषु भक्तिरसस्य मार्मिकाभिव्यक्तिः कृता अस्ति। चतुर्दशाधिकशतपद्यात्मके देवागमस्तोत्रे मञ्जुलभावाभिव्यक्तिर्दृश्यते। चतुष्षष्टिपद्यात्मके युक्त्यनुशासनस्तोत्रे पद्येषु सर्वत्रार्थगौरवरूपवैशिष्ट्यं विराजते। षोडशाधिकशतपद्यात्मके जिनशतकस्तोत्रे चित्रकाव्यशैल्यां पद्यानि विरचितानि सन्ति। अस्मिन् स्तोत्रकाव्ये कलापक्षस्य प्राधान्यमस्ति। अस्य ''जिनशतकालङ्कार'' 'स्तुतिविद्या' चेत्यभिधानेऽपि विद्येते।

2. **द्वात्रिंशिकास्तोत्रम् -** इदं स्तोत्रं सिद्धसेनदिवाकरस्य रचना अस्ति। अत्र कविना द्वात्रिंशत्रचनाः सङ्कलिताः। प्रत्येकरचनायां द्वात्रिंशत्पद्यानि सन्ति। एतस्मादेव कारणात् स्तोत्रस्याभिधानं ''द्वात्रिंशिकास्तोत्र'' मिति प्रथितमस्ति। प्रौढभाषायां रचिते स्तोत्रेऽस्मिन् भावाभिव्यक्त्या सह समुचितालङ्कारविन्यासोऽपि विहितोऽस्ति। येन भाषाभावोभाभ्यां दृष्टिभ्यां स्तोत्रमिदं कमनीयतामावहति।

3. **देवनन्दिपूज्यपादस्य स्तोत्राणि -** देवनन्दिपूज्यपादरचितानि अनेकलघुस्तोत्राणि सन्ति। एतेषु स्तोत्रेषु विविधभक्तीनां सन्निवेशोऽस्ति। तद्यथा सिद्धभक्तिस्तोत्रम् श्रुतभक्तिस्तोत्रम् चरित्रभक्तिस्तोत्रम् योगभक्तिस्तोत्रमित्यादयः।

4. **जिनेन्द्रगुणसंस्तुतिः -** पात्रकेसरीप्रख्यकविना विरचितमिदं स्तोत्रं जिनेन्द्रगुणस्य स्तुतीः क्रोडीकरोति। अस्मिन् स्तोत्रे पञ्चाशत्पद्यानि सन्ति। अत्रत्यपद्येषु काव्यात्मकसौन्दर्यं प्रौढिपूर्णमस्ति।

5. **भक्तामरस्तोत्रम् -** आचार्यमानतुङ्गविरचितं भक्तामरस्तोत्रं जैनस्तोत्रेषु अन्यतमं स्थानं भजते। अस्मिन् स्तोत्रे अष्टचत्वारिंशत्पद्यानि सन्ति। श्वेताम्बरपरम्परायामत्र चतुश्चत्वारिंशत्पद्यानि एव सन्ति। अत्रत्यपद्यानि वसन्ततिलकावृत्ते निबद्धानि सन्ति। उदात्तभावाभिव्यक्तिदृष्ट्या स्तोत्रमिदमुत्कृष्टमस्ति।

6. **कल्याणमन्दिरस्तोत्रम् -** कुमुदचन्द्राख्यकविना प्रणीतमिदं स्तोत्रं चतुश्चत्वारिंशत्पद्यात्मकमस्ति। इदं स्तोत्रं भक्तामरस्तोत्रप्रभावितं प्रतिभाति। भाषाभावोभाभ्यां दृष्टिभ्यां काव्यमिदं कमनीयमस्ति।

7. **विषापहारस्तोत्रम् -** इदं स्तोत्रं धनञ्जयाख्यकवेः रचना अस्ति। स्तोत्रेऽस्मिन् चत्वारिंशत्पद्यानि सन्ति। एतेषु ललितभाषायां जिनस्तुतयो निबद्धाः सन्ति।

8. **एकीभावस्तोत्रम् -** इदं स्तोत्रकाव्यं वादिराजकवेः रचना अस्ति। अस्य 'कल्याणकल्पयुग' इत्यपराभिधानमपि प्रथितमस्ति। स्तोत्रेऽस्मिन् पञ्चविंशतिपद्यानि सन्ति। मन्दाक्रान्तावृत्ते निबद्धानि पद्यानि भाषाभावोभयदृष्टिभ्यां कमनीयानि सन्ति।

9. **जिनशतकम् -** इदं स्तोत्रं जम्बूकवेः रचना अस्ति। शतपद्यात्मके स्तोत्रेऽस्मिन् स्रग्धरावृत्ते निबद्धानि पद्यानि प्रौढभाषायां रचितानि सन्ति। अत्र कविः भावध्वन्यभिव्यक्तौ पूर्णसमर्थः दृश्यते।

10. **अन्ययोगव्यवच्छेदिकास्तोत्रम् -** इदं स्तोत्रं हेमचन्द्राचार्यस्य रचना अस्ति। अत्र द्वात्रिंशत्पद्यानि सन्ति। एतेषु पद्येषु दार्शनिकपीठिकायां भगवतो महावीरस्य स्तुतयो विहिताः सन्ति।

11. **अयोगव्यवच्छेदिकाद्वात्रिंशिका -** इदं स्तोत्रमपि हेमचन्द्राचार्यस्य रचना अस्ति। अत्रापि द्वात्रिंशत्पद्यानि सन्ति। अत्रत्यपद्येष्वपि दार्शनिकपीठिकायां भगवतो महावीरस्य स्तुतयो निबद्धाः सन्ति।

बौद्धस्तोत्रसाहित्यम् - नास्तिकस्तोत्रसाहित्ये बौद्धस्तोत्राणामपि परिगणनं क्रियते। बहवः बौद्धकवयः संस्कृतभाषायां स्तोत्रकाव्यानि विरचितवन्तः। एतेषु स्तोत्रेषु भगवतस्तथागतस्य भक्तिरसनिर्भराः स्तुतयो निबद्धाः सन्ति। एतेषां बौद्धस्तोत्राणां संक्षिप्तविवरणमत्र प्रस्तूयते।

1. **गण्डीस्तोत्रम् -** इदं स्तोत्रं महाकवेरश्वघोषस्य रचना अस्ति। अस्मिन् स्तोत्रे स्रग्धरावृत्ते निबद्धानि एकोनत्रिंशत्पद्यानि सन्ति। अत्र भगवतस्तथागतस्य बौद्धमठेषु व्यवहृतघण्टायाश्च स्तुतयः निबद्धाः सन्ति।

2. **नागार्जुनस्य स्तोत्राणि -** नागार्जुनेन चत्वारि स्तोत्राणि विरचितानि सन्ति। एतेषां स्तोत्राणां सङ्ग्रहः 'चतुःस्तवः' इति नाम्ना प्रसिद्धोऽस्ति। परन्तु सङ्ग्रहोऽयं संस्कृतभाषायां नोपलब्धः। अस्यानुवादः तिब्बतीभाषायां विद्यते। संस्कृतभाषायामपि नागार्जुनस्य द्वे स्तोत्रे प्रथिते स्तः। ते च निरौपम्यस्तवः अचिन्त्यस्तवश्च। एते स्तोत्रे भक्तिभावभरिते सहजभाषायां च विरचिते स्तः।

3. **हर्षवर्धनस्य स्तोत्रे -** हर्षवर्धनस्य द्वे स्तोत्रे प्रथिते स्तः। ते च सुप्रभातस्तोत्रम् अष्टमहाश्रीचैत्यस्तोत्रञ्च उभयस्तोत्र-गतपद्यानि भावनिर्भराणि सन्ति।

4. **स्रग्धरास्तोत्रम् -** सर्वज्ञमित्रविरचितमिदं स्तोत्रं तारादेव्याः स्तुतौ निबद्धमस्ति।

एवं समासेनात्र संस्कृतस्तोत्रसाहित्यस्य विवरणं प्रदत्तम्। संस्कृतभाषायां स्तोत्रकाव्यप्रणयनस्य परिपाटी साम्प्रतमपि प्रचलति। येन बहूनि स्तोत्रकाव्यानि आधुनिकसमयेऽपि प्रणीतानि प्रणीयन्ते च। एतेषां ज्ञानाय श्रीधरभास्करवर्णेकरमहोदयस्य 'संस्कृतवाङ्मयकोश' इत्याख्यस्य ग्रन्थस्य ग्रन्थखण्डोऽनुशीलनीयः।

संस्कृतभाषायां शतनामकीर्तनव्याजेन सहस्रनामकीर्तनव्याजेन वा अपि स्तोत्रप्रणयनस्य परम्परा दृश्यते। अस्यां परम्परायां बहूनि सहस्त्रनामस्तोत्राणि प्रथितानि सन्ति। तद्यथा महाभारतगतं विष्णुसहस्त्रनामस्तोत्रम् नारदपञ्चरात्रोक्तं श्रीविष्णुसहस्रनामस्तोत्रम् श्रीगोपालसहस्रनामस्तोत्रम् पुरुषोत्तमसहस्त्रनामस्तोत्रम् श्रीरामसहस्त्रनामस्तोत्रम् हनुमत्सहस्त्रनामस्तोत्रम् श्रीशिवसहस्त्रनामस्तोत्रम् श्रीगणेशसहस्रनामस्तोत्रम् श्रीसूर्यसहस्रनामस्तोत्रम् देवीसहस्रनामस्तोत्रम् ललितासहस्रनामस्तोत्रम् दकारादिदुर्गासहस्रनामस्तोत्रम् दशमहाविद्यासहस्रनामस्तोत्रम् कालीसहस्रनाम- स्तोत्रम् श्रीतारातकारादिसहस्रनामस्तोत्रम् त्रिपुरसुन्दरीसहस्रनामस्तोत्रम् षोडशीसहस्रनामस्तोत्रम् भुवनेश्वरीसहस्रनामस्तोत्रम् छिन्नमस्तासहस्रनामस्तोत्रम् त्रिपुराभैरवीसहंस्रनामस्तोत्रम् महाविद्याधूमावतीसहस्रनामस्तोत्रम् बगलामुखीसहस्रनामस्तोत्रम् महाविद्यामातङ्गीहस्त्रनामस्तोत्रम् कमलात्मिका महाविद्यासहस्रनामस्तोत्रम् गङ्गासहस्रनामस्तोत्रम् च। एतेषां स्तोत्राणां परिचयाय सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयानुसंधानपत्रिका सारस्वतीसुषमायाः वर्ष 44 1-2 अङ्कयोः प्रकाशितस्य गङ्गासहस्रनामस्तोत्रस्य डॉ. करुणापतित्रिपाठी लिखिता प्रस्तावना अनुशीलनीया। सहस्रनामस्तोत्रतुल्यं संस्कृतसाहित्ये शतनामस्तोत्रस्य अष्टोत्तरशतनामस्तोत्रस्य वा प्रणयनपरम्परा दृश्यते। एवं संस्कृतसाहित्ये अतिविशालं स्तोत्रसाहित्यं विद्यते। साम्प्रतमपि बहूनि स्तोत्रकाव्यानि प्रणीयन्ते।

संस्कृतस्तोत्रसाहित्यवैशिष्ट्यानि - संस्कृतभाषायां लिखितं निखिलस्तोत्रसाहित्यं मुक्तकशैल्यां रचितमस्ति। एतेषु स्तोत्रेषु सर्वत्र कवेः स्तोतुः वा भक्तिभावस्य व्यञ्जना भवति। येन सर्वत्र देवादिविषयिका रतिः व्यज्यते। यत्र स्तोत्रे इयं देवादिविषयिकारतिः प्राधान्येन व्यञ्जिता भवति तत्र सर्वत्र भावध्वनिः पदं लभते। यत्र च देवादिविषयिकारतिः गुणीभूताभवति तत्र सर्वत्र गुणीभूतव्यङ्ग्यध्वनिभेदः पदं लभते। एवं सर्वाणि स्तोत्रकाव्यानि उत्कृष्टकाव्यनिदर्शनानि भवन्ति। पण्डितराजजगन्नाथः स्तोत्रकाव्यानि भावध्वनेरुदाहरणत्वेन निर्दिशति। तद्यथा-

'मन्निर्मिताश्च पञ्चलहर्यो भावस्य।' (रसगङ्गाधरप्रथमाननसमाप्तौ) संस्कृतभाषायां निबद्धं स्तोत्रसाहित्यं स्वविशालतया वैविध्यतया वा सर्वाण्यन्यानि साहित्यानि अतिशेते। विशालस्तोत्रसाहित्ये अप्रकाशितानां स्तोत्राणां सङ्ख्या

अतिभूयसी वर्तते। एतानि अप्रकाशितानि विविधस्तोत्रकाव्यानि विभिन्नग्रन्थालयेषु पाण्डुलिपिरूपे प्राप्यन्ते। परन्तु यानि स्तोत्रकाव्यानि प्रकाशितानि सन्ति तेषां सङ्ख्या अपि न न्यूना अस्ति अपि तु भूयसी अस्ति। विविधाप्रकाशितस्तोत्राणां प्रकाशनाय सुधीभिः प्रयासो विधेयः। यद्यप्याधुनिकसमये संस्कृतानुसन्धानक्षेत्रे भृशं कार्यं कृतं विद्वद्भिस्तथापि संस्कृतस्तोत्रसाहित्यक्षेत्रे इदमनुसन्धानकार्यमति-न्यूनमस्ति। अतः संस्कृतसाहित्यानुसन्धाननिरतैः शोधार्थिभिः शोधनिर्देशकैश्च संस्कृतस्तोत्रसाहित्यमधिकृत्य शोधकार्याणि सम्पादनीयानि। येनानागतकाले विशालाप्रकाशितं स्तोत्रसाहित्यं प्रकाशितं भवेत् संस्कृत भाषानिष्ठभक्तिभावश्च सर्वत्र प्रसरेत्। संस्कृतस्तोत्रसाहित्यमधिकृत्य समुदितरूपेणापि शोधकार्यं भवितुं शक्यते। समासेन येन केनापि प्रकारेण सुधीभिः स्तोत्रसाहित्यगतसौन्दर्यस्य प्रकाशनं करणीयमितिशम्।।

2

महर्षिपाणिनिना समादृता आचार्यप्रवराः

किरण आर्या

सर्वज्ञानमयो हि सः इति मनुवचनानुसारं वेदा एव व्याकरणशास्त्रस्यापि उद्बोधका इति सर्वेषां वैयाकरणानां सुधियां मतम्। ततः प्रभृति महर्षि-पाणिनिपर्यन्तं एतद्व्याकरणशास्त्रं सांगोपांगरूपेणास्मत्समक्षं निजसकलस्वरूपं प्रस्तौति। पाणिनेः पूर्वमनेके वैयाकरणाः व्याकरणाचार्याः संबभूवुः ये स्वकीये ग्रन्थे व्याकरणं सम्पोषयांचक्रुः। तेषां ग्रन्थास्त्विदानीं न समुपलभन्ते परं ते अन्यान्यग्रन्थेषु नामकीर्तिशेषाः वरीवृतन्ति। उपलब्धेषु च व्याकरणव्याख्याग्रन्थेषु प्रमाणभूता इव विराजन्ते। अभिधेयान्याचार्याणान्तथा -

शिव-चारायण-काशकृत्स्न-शान्तनव-वैयाघ्रपद्य-माध्यन्दिनि-रौढि-शौनकि गौतम-व्याड्यादयः। महर्षिपाणिनेः प्राक् अन्येऽपि वैयाकरणाः अभूवन् परमेते उपर्युक्तास्ते वैयाकरणास्सन्ति येषां नामोल्लेखः पाणिनिना स्वीयामष्टाध्याय्यां न कृतमः। एतेषां ग्रन्थाश्चापि पाणिनिसमये मन्ये अनुपलब्धा एव आसन्नत एव एते पाणिनीये न लोलोक्यन्ते।

संस्कृतभाषायाः यावन्ति आर्षव्याकरणानि निर्ममिरे तेषु सम्प्रति एकमात्रं पाणिनोपज्ञमकालकं व्याकरणं सांगोपांगरूपेणाधुना उपलभ्यते, प्राचीनार्षवाङ्मयस्यैषोऽनुपमनिधिः। अनेन देववाण्याः प्राचीनार्वाचीनं समस्तमपि वाङ्मयं सूर्यस्य आलोक इव प्रकाशमानं भवति। अस्यातिमनोहरां सुसम्बद्धां सूक्ष्मतमपदार्थद्योतिकां रचनामवीक्ष्य सर्वे सुधियः मुक्तकण्ठेनेमां प्रशंसन्ति। भारतीयप्राचीनाचार्याणां सूक्ष्मचिन्तनस्य सुपरिपक्वज्ञानस्याद्भुतप्रतिभायाश्च निदर्शकोऽयमनुपमग्रन्थः। सततमेनेन देववाणी गौरवान्वितायते। अखिलेऽपि विश्वे कस्यापि प्राचीनार्वाचीनभाषायाः एतादृशं परिष्कृतं व्याकरणमद्यावधि न निर्ममे।

पाणिनेः पूर्वमन्येऽपि व्याकरणप्रवक्तारोऽभवन्येषां नामानि पाणिनीयव्याकरणे उपलभ्यन्ते। प्रथमतः पाणिनिः प्राचीनं सर्वं व्याकरणमधिजगौ तत्र भाषादृष्ट्या तेषामपूर्णत्वमवगम्य सर्वेभ्यः व्याकरणेभ्य यथोचितं रसं निपीय स्वकीयमेकं नैवोपक्रममपितूपज्ञं व्याकरणमकार्षीत्। व्याकरणे च तस्मिन् यत्र तत्र स्वकीयमौदार्यं दर्शयता 'इदन्न मम' भावनामिति च प्रकटीकृतेन पाणिनिना तेषां व्याकरणप्रवक्तृणामाचार्याणां नामोल्लेखं विधाय तानम्प्रत्यादरः श्रद्धांजलिस्तान्प्रति समर्प्यते।

महर्षिपाणिनिना समादृतास्ते आचार्यास्तावद्दश सन्ति - आपिशलि-काश्यप-गार्ग्य-गालव-चाक्रवर्मण-भारद्वाज-शाकटायन-शाकल्य-सनक-स्फोटायनाद यः। तत्र क्रमशस्ते परिचाययन्ते -

आपिशल्याचार्याः - आपिशल्याचार्यस्योल्लेखः पाणिनीयाष्टाध्याय्यां वा सुप्यापिशलेः'[1] इत्येकस्मिन् सूत्रे विद्यते। महाभाष्यकारेण पतंजलिना खण्डिकादिभ्यश्च'[2] सूत्रव्याख्याने आपिशलेः मतं प्रमाणरूपेण प्रस्तौति - एवं च कृत्वाऽऽपिशलेराचार्यस्य विधिरुपन्नो भवति-वेञुरनिकमुत्पादयतीति। पाणिनीयाष्टाध्याय्याः व्याख्याकाराः अन्ये वामनन्यासकारजिनेन्द्रबुद्धिकैयटादयः अपि आपिशलेः व्याकरणस्यानेकानि सूत्राणि सूत्रव्याख्यावसरे उद्धरन्ति, किन्तु पाणिनिना सन्धिप्रकरणे वा सुप्यापिशलेरिति सूत्रं कृत्वा आपिशलेराचार्यस्य स्मरणं तेषां सम्मानं च विधीयते। तदिह सूत्रे काशिकाकारः लिखति- वाग्रहणेन वृद्धिविकल्पः भवत्येव पुनरपि आपिशलिग्रहणं पूजार्थमिति।

काश्यपाचार्याः - महर्षिपाणिनिः स्वीये ग्रन्थे आचार्यकाश्यपमतं स्थानद्वये करोति, तथा - तृषिमृषिकृशेः काश्यपस्य[3] अपि च नोदात्तस्वरितोदयमगार्ग्यकाश्यप-गालवानाम्'[4]। तृषिमृषिकृशेः इति सूत्रं क्त्वाप्रत्यस्य कित्वाकित्वप्रकरणे विद्यते। तत्र 'वा' इत्यनुवर्तते एव अतः प्रकृतसूत्रे कित्वस्य विकल्पे सिद्धे काश्यपग्रहणं पूजार्थमादरार्थं चेति काशिकाकारः। महर्षिपाणिनेराचार्याणां प्रति कियती आदरभावना आसीदपि च निरहंकारत्वमपि पाणिनेस्स्वभाव इत्यष्टाध्याय्या अवसितिकालेऽपि अनेकाचार्यसंकीर्तनेन'[5] पूजनेन च स्पष्टं संकेतः भवति। सद्भावना तथाचार्यस्येह दृश्यते यन्नैवोपक्रमो मे अपितु यावदिह सर्वं वैयाकरणत्वम्मयि, तत्प्राचीनाचार्याणामेव, अहन्तु केवलं माध्यम एवेति।

गार्ग्याचार्याः- पाणिनीयाष्टाध्याय्यां गार्ग्याचार्यास्स्थानत्रयमभिसिंचन्ति स्वनाम्ना पाणिनिमुखेन। अङ्गार्ग्यगालवयोः[6], ओतो गार्ग्यस्य[7], नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्[8]। सर्वेषु सूत्रेषु काशिकाकारेण गार्ग्यग्रहणं पूजार्थमित्युक्तम्। गार्ग्यस्यानेकानि मतानि ऋक्प्रातिशाख्ये वाजसनेयप्रातिशाख्ये उपलभ्यन्ते, तेषां सूक्ष्मपर्यवेक्षणेन विदितमेतद्भवति यत् गार्ग्यस्य व्याकरणं सर्वांगपूर्णमविद्यत इति।

गालवाचार्याः - पाणिनिनाष्टाध्याय्यां चतुर्षु स्थलेषु गालवाचार्यस्यादरोऽकारि। इको ह्रस्वोङ्यो गालवस्य,'[9] तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य'[10] अङ्गार्ग्यगालवयोः''[11] नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्''[12]। सर्वत्र आदरार्थमाचार्याभिधानग्रहणम्। स्वकीये ग्रन्थे भाषावृत्तौ पुरुषोत्तमदेवः गालवस्य व्याकरणसम्बन्धिमतं प्रस्तौति - इकां यण्भिर्व्यवधानं व्याडिगालवयोरिति वक्तव्यम्, दधियत्र, दध्यत्र, मधुवत्र, मध्वत्र (6.1.77) इति ततः ज्ञायते गालवस्यासीत् व्याकरणं किंचित्।

चाक्रवर्मणाचार्याः- चाक्रवर्मणाचार्यस्योल्लेखः पाणिनीयाष्टाध्याय्यामपि चोणादिसूत्रेषूपलभ्यते। तदिहाष्टाध्याय्यां एकधैवास्याचार्यस्योल्लेखः दृश्यते। ई चाक्रवर्मणस्य'[13] इति। उणादिसूत्रेऽपि पंचपाद्युणादौ दशपाद्युणादौ च कपश्चाक्रवर्मणस्य'[14] इत्युभयत्रोल्लेखं द्रष्टुं शक्यते। भट्टोजिदीक्षितश्चापि शब्दकौस्तुभेऽस्यमतमेकमुद्धरति'[15]। ई चाक्रवर्मणस्य इति सूत्रे चाक्रवर्मणग्रहणं विकल्पार्थमिति लिखति पाणिनिः, अर्थात् प्रकृते सूत्रे वा इत्यनुवृत्यभावात् चाक्रवर्मणग्रहणं कृत्वा पाणिनिस्तेषामादरार्हां भावनां हृदि निधाय वैकल्प्यवांछां स्वीकरोतीति स्पष्टं भवति।

भारद्वाजाचार्याः - पाणिनीये तन्त्रेऽष्टाध्याय्यां भारद्वाजाचार्यस्य ग्रहणमेकत्रैव दृश्यते- ऋतो भारद्वाजस्य '[16] इति। चतुर्थाध्याये कृकर्णपर्णाद् भारद्वाजे'[17] इति सूत्रे भारद्वाजशब्दः विद्यते परमिह भारद्वाजशब्दः देशवाची न त्वाचार्यवाची इति काशिकाकारमतम् - इह भारद्वाजशब्दः देशवचने एव न गोत्रशब्दः। भारद्वाजस्य व्याकरणविषयकं मतं तैत्तिरीयप्रातिशाख्ये'[18] मन्त्रायणीप्रातिशाख्ये'[19] च प्राप्नोति - अनुस्वारेऽण्विति भारद्वाजः इति।

शाकटायनायाचार्याः - शाकटायनाचार्यस्योल्लेखः त्रिषु स्थलेषु विद्यते ग्रन्थे - लङः शाकटायनस्यैव'[20], व्योर्लघुप्रयत्नतरः शाकटायनस्य'[21], त्रिप्रभृतिषु शाकटायनस्य'[22]

इति। इह त्रिष्वेव सूत्रेषु काशिकाकारः आचार्याभिधेयग्रहणं पूजार्थमिति स्पष्टं न लिलेख परन्त्वत्र पूजार्थमेव ग्रहणमिति मन्यामहे यतोहि स्वकीयं मतं, आचार्यार्चनापि स्यादित्याकांक्षया आचार्यनामग्रहणं करोति पाणिनिः। तथाहि लङः शाकटायनस्यैव सूत्रस्य स्थाने लङोऽपि = (लङः अपि झेर्जुस् भवति) इति लघीयस्सूत्रं विधाय झेर्जुसित्याशयः पूर्णतामवाप्नोति, तन्न कृत्वा महत्सूत्रविधानं आचार्यस्य सम्मानाय अथ च 'अन्येषां मते न' इति कार्यद्वयं संजायते। व्योर्लघु प्रयत्नतरः शाकटायनस्य सूत्रे व्योः लघुप्रयत्नतर आदेशो केवलं शाकटायनमते विद्यते न च पाणिन्यादीनां मतेऽपि। अतोऽस्य सूत्रस्यावश्यकता नासीत् परमस्मिन्प्रकरणे आचार्यमन्तव्यं स्मृत्वा तन्मतं प्रदर्श्य आचार्यपाणिनिः एतं सम्मानयति। त्रिप्रभृतिषु शाकटायनस्य सूत्रेणामुना अस्मादुपर्युक्तेषु सूत्रत्रयेषु विहितं कार्यं द्वित्वं शाकटायनाचार्यः नांगीकरोतीति वाजसनेयप्रातिशाख्ये[23] ऋक्प्रातिशाख्ये'[24] च शाकटायनस्य कतिधा निर्देशः प्राप्नोति। निरुक्तकारः यास्काचार्योऽपि वैयाकरणशाकटायनस्य मतमुद्धरति - **तत्र नामान्याख्यातजानि शाकटायनो नैरुक्तसमयश्च**[25]। महर्षिपतंजलिरपि सुस्पष्टाक्षरैः 'शाकटायनः व्याकरणशास्त्रस्य प्रवक्ता' इति कथयति - व्याकरणे शकटस्य च तोकम्[26], वैयाकरणानां शाकटायनः'[27] इत्यादि। वैयाकरणेषु शाकटायनः सर्वाशयेन श्रेष्ठ इति पतंजलियास्कादयः मन्वते। हीने'[28] इति सूत्रे काशिकाकारः उदाहरति - अनुशाकटायनं वैयाकरणाः (सर्वे वैयाकरणाः शाकटायनाद्धीनाः) उपोऽधिके च'[29] सूत्रेऽपि उपशाकटायनं वैयाकरणाः इत्युदाहरणं तद्भावान्वितमेव प्राप्नोति। वैशिष्टस्यास्य कारणं यत् निरुक्तयः महाभाष्यस्य च वचनेन विदितमेतद् भवति यत् वैयाकरणेषु शाकटायनाचार्य एव तथा बभूव यः सकलनामशब्दा आख्यातजा इति अमन्यत - तत्र नामान्याख्यातजानि शाकटायनः इति। अनेन निश्चीयते यत् शाकटायनाचार्यः महत्त्वपूर्णं व्याकरणशास्त्रं निर्ममे। यत्र सर्वे शब्दाः धातुपूर्वकं व्युत्पन्नाः इति दर्शिताः, तस्मादेव शाकटायनः सर्वेषु महत्त्वातिशायी विद्यते।

शाकल्याचार्याः - पाणिन्यष्टाध्याय्यां शाकल्याचार्याः चतुर्षु स्थलेषु विराजते - संबुद्धौ शाकल्यस्येतावनार्षे'[30], इको सवर्णे शाकल्यस्य'[31], लोपः शाकल्यस्य'[32], सर्वत्र शाकल्यस्य'[33]। संबुद्धौ शाकल्यस्येतावनार्षे इति सूत्रे शाकल्यग्रहणं विभाषार्थमिति काशिकाकारः लिखति, तत्र 'वा' इति ग्रहणं लघुतां याति पुनरपि आचार्यनामग्रहणं

कार्यद्वयार्थमेव - वैकल्प्यार्थम्, आचार्यादरार्थं च। इको सवर्णे शाकल्यस्य इति सूत्रे शाकल्यग्रहणं पूजार्थमिति स्पष्टं काशिकायां दृश्यते। लोपः शाकल्यस्य सूत्रेऽपि 'वा' ग्रहणेन विकल्पे सिद्धे शाकल्यग्रहणं सम्मानार्थम्, विभाषार्थं च। सर्वत्र शाकल्यस्य सूत्रमिदं - यरः द्वित्वप्रकरणे विद्यते तत्र ज्ञापयति पाणिनिः यत् शाकल्याचार्यः यत्र द्वित्वं न मन्यते तत्र तेषां स्मरणमादराय एव। शौनकाचार्य ऋक्प्रातिशाख्ये'[34], कात्यायनश्च वाजसनेयप्रातिशाख्ये'[35] शाकल्यमुद्धरतः। ऋक्प्रातिशाख्ये तु शाकल्यनाम्ना सर्वे नियमाः शाकल्यस्यैव विद्यन्ते'[36]। सिन्नित्यसमासयोः', शाकलप्रतिषेधो वक्तव्यः'[37], इत्यादिवार्तिकेष्वपि शाकल्यमतप्रतिषेधपूर्वकं शाकल्यं विशेषयति कात्यायनः। महाभाष्यकारेण भाष्ये'[38] शाकल्यनियमस्य शाकलनाम्ना उल्लेखः कृतः।

सेनकाचार्याः- सेनकाचार्यस्योल्लेखः पाणिनिः एकत्रैव चकार - गिरेश्च सेनकस्य'[39]। पाणिनीयग्रन्थादन्यत्रास्य सूत्रस्य अभावात् न कथनीयं शिष्यते। सूत्रेऽस्मिन् काशिकाकारोऽलेखीत् सेनकग्रहणं पूजार्थमेव, वा इत्यनुवर्तत एवेति।

स्फोटायनाचार्याः- एतेषामप्याचार्याणामेकधैव दृश्यते वर्णनम्- अवङ् स्फोटायनस्य'[40]। अन्यत्र क्वचिदस्याचार्यस्य नाम नोपलभ्यते। प्रकृतसूत्रप्रसंगे स्फोटायनग्रहणं पूजार्थम्, विभाषा इत्यनुवृत्तित्वादिति काशिकाकारस्य कथनम्।

एवं च महर्षिपाणिनिः स्वीये ग्रन्थे दशाचार्याणां नामग्रहणपूर्वकमादरमाचक्षते। एतदतिरिक्तं - आचार्याणाम्'[41], उदीचाम्'[42], एकेषाम्'[43], प्राचाम्'[44], इत्यादीन् शब्दान् प्रयुज्य अन्ये आचार्यास्तदीये ग्रन्थे मनसाद्रियन्ते नामान्तरेण। प्राचीन- संस्कृतवाङ्मये षड्विंशत्याचार्याणां वैयाकरणानामुल्लेख उपलब्धो भवति येषु दशाचार्याः सनामाभिहिताश्चान्ये चोदीचामादिशब्दैः संगृहीताः। महर्षिपाणिनिः स्वोपज्ञे व्याकरणे सर्वेषां कृते स्वकीयां भावांजलिं प्रस्तौति।

सन्दर्भसूचिका -

1. *पा. अष्टा. 6.1.92*
2. *महाभाष्ये 4.2.45*
3. *पा. अष्टा. 1.2.25*

4. पा. अष्टा. 8.4.67
5. पा. अष्टा.7.3.99
6. पा. अष्टा.8.3.20
7. पा. अष्टा.8.4.67
8. पा. अष्टा.6.3.61
9. पा. अष्टा.7.1.74
10. पा. अष्टा.7.3.99
11. पा. अष्टा.8.4.67
12. भाषावृतौ 6.1.77
13. पा. अष्टा.6.1.130
14. प. उ. 3.144, द.उ.7.11
15. शब्दकौस्तुभे 1.1.27
16. पा. अष्टा.7.2.63
17. पा. अष्टा.4.2.145
18. तै. प्रा. 17.3
19. मन्त्र. प्रा. 2.5.6
20. पा. अष्टा.3.4.111
21. पा. अष्टा.8.3.18
22. पा. अष्टा.8.4.50
23. वा. प्रा. 3.9, 12, 87
24. ऋक्प्रा.1.16, 1,3,39
25. नि. 1. 12
26. महाभा. 3.3.1
27. महाभा. 3.2.115
28. पा. अष्टा.1.4.86
29. पा. अष्टा.1.4.87
30. पा. अष्टा.1.1.16
31. पा. अष्टा.6.1.127

32. पा. अष्टा.8.3.19

33. पा. अष्टा.8.4.51

34. ऋक्प्रा. 3.13, 22.1 4.13

35. वाज. प्रा. 3.10

36. ऋक्प्रा. 6.14,20,27

37. महाभा. 6.1.127

38. महाभा. 6.1.127

39. पा. अष्टा.5.4.112

40. पा. अष्टा.6.1.123

41. पा. अष्टा.7.3.49

42. पा. अष्टा.4.1.153

43. पा. अष्टा.8.3.104

44. पा. अष्टा.4.1.17

3

ध्रुपदीसंस्कृतसाहित्ये गणिकास्थितिविमर्शनम्

शुभ्रजित् सेनः

मानवचरित्रस्य प्रवृत्तिद्वयम् - क्षुधा जैविकताडनं चेति। प्रवृत्तिद्वयं मनुष्येषु विशेषतया परिलक्ष्यते। समाजस्वीकृतेन पथा मानवाः यदा यौनक्षुधां निवारयितुं न शक्नुवन्ति, तदा मानवानां जैविकताडनं मानवान् अन्यायमार्गे परिचालयति। पुरुषाः यथा यौनक्षुधां चरितार्थयितुं स्वभार्यां विना अन्यया नार्य्या सह सम्पर्कं स्थापयन्ति, तथैव नार्यः अन्नवस्त्रार्थं स्वशरीरं विक्रीणन्ति। एवंरूपेण अनेन आर्थिकविनिमयेन परस्परयोरेकः अवैधयौनसम्पर्कः स्थापितो भवति। इदमेव गणिकावृत्तेः उद्योगात्मकरूपम्।

'नह माता, नह कन्या, नह वधूः, सुन्दरी रूपसी, हे नन्दनवासिनी' इति विश्वकवी रवीन्द्रनाथ-ठक्कुरः स्वरचितायां 'उर्वशी'ति कवितायां स्वर्गीयाप्सरसाम् उर्वश्याः सुन्दरतया चित्राङ्कणञ्चकार। यासां गृहं तथा संसारबन्धनञ्च न स्तः, याः सर्वदा स्वर्गीयदेवतारभ्यो मर्त्यपुरुषपर्यन्तं सर्वान् विस्मारयन्ति, ता एवाप्सरसः। एता बहुगामिन्यस्तथा स्वेच्छाचारिण्यो भवन्ति। प्रायः एतासु अप्सरारूपीषु बहुगामिनीषु वाराङ्गनायाः कल्पना क्रियते शास्त्रकृद्भिः। एतासां वाराङ्गनानाम् आर्याणां किमपि सांसारिकबन्धनं न विद्यते तथा चैताः बहुपुरुषाणां जीवनसङ्गिन्यो भवन्तीति न केवलं स्वर्गवासिनामभिप्रायः, मर्त्यवासिनामपि। सामाजिकदृष्ट्या ताः वाराङ्गनाः गृहस्थस्त्रिभ्यो भिद्यन्ते तथा समाजस्य प्रान्तिकस्थले तासां स्थानं वर्तते।

सामाजिकदृष्ट्या नैतिकदृष्ट्या च गणिकावृत्तिर्दोषवहा पद्धतिरपि जगद् परिव्याप्य स्वीकृता वर्तते। समाजतात्त्विकेन जर्ज-रालि-स्कट्-महाभागेन (George Reley Scott) तस्य 'A history of Prostitution from Antiquity to the Present Day' इत्यस्मिन् ग्रन्थे यदुक्तं, तस्य संस्कृतार्थस्तावत् पतिता खलु

विशेषसम्प्रदायान्तर्गता नारी, या च पुरुषस्य यौनसुखमुपभोक्तुकामा स्वशरीरमादाय जीविकयार्थमुपार्जयतीति। परं तेनैव गणिकायाः अपरैकश्रेणी स्व्यकारि, याश्च नार्य्यः अर्थं विनैव पुरुषैः समं यौनसम्पर्कं स्थापयन्ति, ताः खलु 'वृत्तिहीना पतिता' 'Amateur Prostitution' वेति। Britannic इत्यस्मिन् अभिधानात्मकग्रन्थे वेश्यासंज्ञा न्यरूपि - 'Prostitution, the practice of engaging in relatively indiscriminate sexual activity, in general with someone who is not a spouse or a friend] in exchange for immediate payment in money or other valuables'. अर्थात् वेश्या नाम्नी स्त्री अर्थविनिमयेन परिचितापरिचितैर्जनैः समं देश-काल-भाषादिनिर्विशेषेण रन्तुं प्रवृत्ता भवतीति। समाजस्य विशेषश्रेणीभाजां मानवानामेषां भूमिका कथमपि अस्वीकर्तुं नालम्। परमेतदपि सत्यं यत् एकविंशशताब्द्यामपि समाजस्येयं श्रेणी सर्वापेक्षया उपेक्षिता अवहेलिता प्रचारालोकविवर्जितेति निश्चप्रचमभिधातुमलम्।

ननु कामाचार-गणिकावृत्तयोर्मध्ये को भेद इति चेदुच्यते शास्त्रकृद्भिः संस्कृतकविभिश्च यत् कामाचारे रतिसुखमेव मुख्यं किन्तु गणिकावृत्तौ अर्थोपार्जनमेव प्रधानम्। वात्सायनः 'कामसूत्रम्' इति ग्रन्थे चतुर्थाधिकरणे आह - ''वेश्यानां पुरुषाधिगमे रतिवृत्तिश्च सर्गात्''। समाजस्य सर्वापेक्षया उपेक्षितस्य प्रचारालोकवर्जितस्य सम्प्रदायस्य अर्थात् गणिकासम्प्रदायस्यावस्थाननिरूपणमेव मदनुसन्धानकार्यस्य मुख्यो विषयः।

अस्मिन् बन्धे कोऽयं विशेषो वर्तते इति प्रश्नः। वस्तुतः बन्धबन्धनात्पूर्वं विषयाश्रितं ग्रन्थत्रितयमवलोकि। ग्रन्थास्तावत्

- चट्टोपाध्याय, दुर्गापद- संस्कृतसाहित्ये वाराङ्गना, सुवर्णा प्रकाशनी, कलिकाता, 1998 (प्रथमं प्रकाशनम्)
- भट्टाचार्य, सुकुमारी-प्राचीन भारतीय समाज ओ साहित्य-आनन्द पावलिसार्स, कलकाता, 1422
- Ankur, Shingal- The Devadasi System : Temple Prostitution in India, https://escholarship-org/uc/ item/ 37z85 3br, UCLA Women's Law Journal, 22(1) .2015
- Bhattacharji, Sukumari, (1987) - Prostitution in Ancient India, 'Social Scientist' (Vol- 15, No-.2).

परमस्मिन् ग्रन्थत्रितये सामग्रिकदृष्ट्या तथा च आर्थसामाजिकदिशा गणिकास्थितिर्न हि विश्लेषितेति कृत्वा स्थालिपुलाकन्यायेन बिन्दौ सिन्धुदर्शनवच्च प्राचीने भारते गणिकानां कीदृशी आर्थसामाजिकी स्थितिरासीदिति प्रस्तोतुमयं बन्धनिर्माणप्रयासः। अपि च, शोधप्रबन्धनिर्माणावसरे संग्रहात्मकं (Accumulative Research Methodology) तथा विश्लेषणात्मकञ्च (Analytical Research Methodology) गवेषणारीतिविज्ञानम् अनुसृतं ग्रन्थकर्तृभ्याम्।

गणिकाशब्दस्यार्थः -

गणिकाशब्दः प्रायेण बहुजनभोग्या नारी इत्यस्मिन् अर्थे व्यवह्रियते। सामूहिकरूपेण या नार्य उद्योगत्वेन स्वशरीरेण अन्येषां यौनलिप्सां चरितार्थयितुं यच्छन्ति अथवा अर्थविनिमयेन अन्येभ्यः यौनतृप्तिं ददति, ताः गणिकाः इत्युच्यन्ते। गणिकाशब्दस्य बहवः पर्यायवाचकाः शब्दाः सन्ति, यथा 'वेश्या', 'रण्डी', 'वारस्त्री', 'क्षुद्रा', 'शूला', 'लज्जिका', 'बन्धुरा', 'कुम्भा', 'वर्व्वटी', 'भोग्या', 'भुजिष्या', 'पतिता', 'वाराङ्गना', 'देहपसारिणी', 'देहोपजीविनी', 'रक्षिता', 'वावरणिता', 'देवदासी', 'उपपत्नी', 'जारिणी', 'साधारणी', 'महानग्नी', 'अतीत्वरी', 'विजर्जरा', 'कुटला', 'स्वैरिणी', 'स्वतन्त्रा', 'स्वाधीनयौवना' चेति।

वात्स्यायनः स्वकीये 'कामसूत्रम्' इति ग्रन्थे त्रिविधानां गणिकानां[1] प्रसङ्गमुल्लिखेख, यथा एकपरिग्रहा, अनेकपरिग्रहा, अरिग्रहा चेति। वात्सायनेन गणिकाया नामान्तरविषये उक्तम् - 'कुम्भदासी परिचारिका कुलटा स्वैरिणी नटी शिल्पकारिका प्रकाशविनष्टा रूपाजीवा गणिका चेति वेश्याविशेषाः'[2]। आचार्येण धनञ्जयेन स्वकीये 'दशरूपकम्' इति ग्रन्थस्य द्वितीयेऽध्याये गणिकाविषये उक्तम् - 'साधारणस्त्री गणिका कन्या प्रागल्भ्यधौर्तयुक्[3]'। पुनः विश्वनाथकविराजः स्वकीये 'साहित्यदर्पणः' इति अलङ्कारग्रन्थे साधारणी-सामान्यभेदात् नायिका द्विविधेति उक्तवान् - 'धीरा कला प्रगल्भा स्याद्वेश्या सामान्यनायिका[4]'। साधारणतया गणिकाः रूप-यौवन-शिक्षासु अन्यनार्य्यपेक्षया श्रेष्ठाः भवन्ति[5]। ताश्च नार्योऽर्थकामुकाः सन्ति।

वैदिकसाहित्ये गणिकास्वरूपम् -

भारतवर्षस्य प्राचीनतमे वैदिकसाहित्ये गणिकावाचकाः केचन शब्दा समुपलभ्यन्ते। यथा ऋग्वेदे 'हस्रा' (1.124.7), 'अग्रू' (4.19.9), 'साधारणी'

(1.167.4), 'व्रा' (1.124.8), 'नग्ना' (5.7.8), 'वेश्या' (5.7.8), शुक्लयजुर्वेदस्य वाजसनेयीसंहिता ते 'व्रजयित्री' (30.1), 'पुंश्चली' (30.5), 'साधारणी' 'सामान्या' च (30.12), 'अतिवारी' (30.15), 'अतिष्कद्वरी' (30.15), कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायां नामद्वयं लभ्यते (3.47), तैत्तिरीयब्राह्मणे 'अपस्कद्वरी' (3.4.11. 1) इति शब्दव्यवहारः गणिकार्थे परिलक्ष्यते।

पालिभाषायाः विनयपिटके मुत्थुत्तियां (संस्कृत मुहूर्तिक, 3.138) जातके च रूपदासी-वन्नदासी-वेश्या-नारिषेर-गामनी-नगरशोभिनी-इत्थि-जनकल्याण्यादिशब्दानां गणिकापर्यायवाचकत्वेन उल्लेखः अस्माभिः दृश्यते।

ऋग्वेदस्य प्रथममण्डलस्यैकस्मिन्नेव ऋचि आम्नायते - 'सुबन्धवो ये विश्वा इव वा अनस्वन्तः श्रव ऐषन्त पज्राः'[6]। इतिहासविद् भिण्टारनित्स् इत्यस्य मते, मन्त्रस्थात् विश्वाशब्दादेव वेश्याशब्दोत्पत्तिरिति[7]। ऋग्वेदे वेश्यावृत्तेः अस्तित्वविषये आम्नायते - 'परा शुभ्रा अयासो यव्या साधारण्येव मरुतो भिभिक्षुः'[8]।

आर्षमहाकाव्ययोः पुराणसाहित्ये च गणिकास्वरूपम् -

पुराण-रामायण-महाभारतेषु बह्वीनां गणिकानां परिचयः उपलभ्यते, ताः स्वर्गवेश्या इति नाम्ना परिचिताः आसन्। यथा ऊर्वशी, मेनका, तिलोत्तमा, घृतिची, विश्वाची, पञ्जिकास्थला, मञ्जुघेषा, अलम्बुषा, सुप्रिया चेत्यादीनि प्रमुख्यनामानि। एताः स्वर्गवेश्याः 'अप्सरा' इति उच्यन्ते। भरतः नाट्यशास्त्रे द्वात्रिंशदप्सराणामुल्लेखं कृतवान्।

रामचन्द्रस्य अभिषेककाले वेश्यानामुपस्थितिरपि वाल्मीकेः 'रामायणम्' इति आर्षकाव्ये परिलक्षिता। ताः समृद्धानां जनानाम् अवलम्बनं कृतवत्यः, दरिद्रान् परित्यजन्ति स्म[9]। महाभारते आरट्टदेशीयाः स्त्रियः वेश्या इति उक्ताः। वाह्लीक देशस्य एकां सतीं आरट्टदस्यवः अहरन्। तस्माद् अभिशापबलाद् आरट्टदेशीयानां प्रत्येकस्मिन् परिवारे एकैका वेश्या जन्म अलभत्[10]। महाभारते बहूनि नारीचरित्राणि समुपलभ्यन्ते, याः बहुचारिण्यः बहुगामिन्यः आसन्। महाभारतस्य आर्षकाव्यस्य आदिपर्वणि दृश्यते यत् गान्धार्य्याः गर्भावस्थायां धृतराष्ट्रार्थं वेश्याः आहूताः -

'गान्धार्य्यां क्लिश्यमानायामुदरेण विवर्धता।
धृतराष्ट्रं महाराजं वेश्या पर्यचरत्किल'[11]।।

पुनश्च, उद्योगपर्वणि युधिष्ठिरः वेश्यानां कृते शुभाशयान् निवेदितवान्। एवञ्च कौरवराज्ये श्रीकृष्णस्य आगमनावसरे वेश्याभिः अभिवादकरणमपि वर्णितम्[12]। अस्मिन्नेव पर्वणि कौरवपाण्डवयोः युद्धकाले पाण्डवानां सेनामण्डल्यां वेश्यानामुपस्थितिः अवर्तत[13]।

ब्रह्मवैवर्तपुराणे नार्यो भेदसन्दर्भे उक्तं यत् एकपत्नी सर्वदा पतिव्रता भवेत्। पतिं विहाय द्वितीयपुरुषं प्रत्यासक्ता नारी कुलटा, त्रीन् पुरुषान् प्रति आकृष्टा नारी वृषली पुंश्चली वेति, चतुरः षट् वा पुरुषान् प्रति आसक्ता नारी वेश्या, सप्त अष्ट वा पुरुषान् काम्यमाना नारी युग्मी, अष्टाधिकं पुरुषं प्रति आसक्ता नारी महावेश्या इति अभिधीयन्ते।

वेश्यागमनेन उद्भूतस्य पापस्य प्रायश्चित्तकरणाय 'प्रजापत्यम्' इत्यासीन्नियमः। नारदस्मृतावुक्तं यत् अर्थग्रहणादनन्तरं वेश्या यदि संभोगकर्मणः स्वात्मानं निवर्तयितुं प्रचेष्टते, तदा तया वेश्यया दण्डः प्राप्तव्यः -

'शुल्कं गृहीता पण्यस्त्री नैच्छन्ती द्विस्तदाप्नुयात्।
अप्रयच्छंस्तदा शुल्कमनुभूयपुमान् स्त्रियम्'[14]।।

मत्स्यपुराणस्य सप्ततितमेऽध्याये वेश्याधर्मस्योल्लेखोऽस्ति। अन्येषु बहुषु पुराणेष्वपि प्रकारान्तरेण वेश्याविषयिणी चर्चावाप्यते। तेषु स्कन्दपुराण-वामनपुराण-ब्रह्मपुराण-भविष्यपुराणानि प्रमुख्यानि। किञ्च, अश्वघोषस्य बुद्धचरितस्य प्रथमे सर्गे सिद्धार्थस्य विहारकाले पुराङ्गनानां वर्णनप्रसङ्गे गणिकानामुल्लेखोऽस्ति।

बौद्धसाहित्ये प्रतिभासितं गणिकाजीवनम् -

बौद्धकथासाहित्ये प्राचीनबौद्धभिक्षुणीनां पञ्चाधिकपञ्चशतं पालिभाषया रचितकवितानां संकलनं खलु थेरिगाथा। तत्र बौद्धभिक्षुणीषु कासाञ्चित् गणिकानां जीवनव्यथापि नग्नतया चित्रितासीत्। बौद्धसाहित्यान्तर्गते अवदानशतके प्रायः दशसंख्यकानां गणिकानां जीवनस्य मर्मन्तुदाख्यानं परिलसितं दृश्यते। किञ्च, कुणालजातके वेश्यासम्प्रदायसम्पर्के अश्लीलं तथा निम्नरुचिवहं वर्णनञ्च चित्रयितं वर्तते। अपि च, मूलसर्वास्तिवादः इत्यस्य 'विनयवस्तु' मुख्यम्, यत्र आम्रपाली वैश्याल्याः गणभोग्यरूपेण उक्तास्ति। 'नयाधम्म कहा' इत्यस्मिन् ग्रन्थे चम्पा इत्याख्याने गणिकानां विविधकलासु विद्यमानं पारदर्शित्वं चर्चितम्। सा

चम्पानाम्नी गणिका बहुभाषिण्यपि आसीत्[15]। ताः विश्वैकविद्यायामपि सुनिपुणाः आसन्[16]। कामाख्यातन्त्रम् इति ग्रन्थे काली-तारा-भैरवादिदेव्याः अपि 'वेश्या' इत्येवंरूपेणाभिहिताः। 'सर्वसिद्धिप्रदा वेश्या कालिकारूपधारिणी' इतीयमुक्तिरेव तस्य प्रमाणम्।

ध्रुपदीसाहित्ये गणिकायाः स्थानम् -

महाकवेः कालिदासस्य मेघदूतकाव्येऽपि वेश्यानामुल्लेखो वर्तते[17]। तत्र पूर्वमेघे तदानीं नगरस्थानां वेश्यानां यौनाचारस्य चित्रं प्रस्फुटितम्। अस्य ग्रन्थस्य पञ्चत्रिंशत्तमे श्लोके मन्दिरगणिकानां वर्णनपुरस्सरमुज्जयिनीनगरस्य देवदासीनामवस्था समुद्धृता। कालिदासकालात् प्रागेव भारतवर्षे देवदासीनामस्तित्वमवर्तत। आसीत् कालिदासस्य 'विक्रमोर्वशीय'मिति नाटके नायिका उर्वशी एका सुपरिचिता गणिका। सा खलु स्वर्गस्था अप्सरा। तस्याः सखी अपि तादृशी गणिकासीत्। अस्मिन् नाटके महाकविकालिदासो याम् उर्वशीं नायिकात्वेनोपस्थापितवान्, सैका बहुभोग्या वेश्या रमणी आसीत्।

अष्टमशतके नवमशतके वा दामोदरगुप्तविरचिते 'कुट्टनीमत' मिति काव्ये वारणसीनगर्याः पटभूमिकायां प्राचीनभारतीयगणिकासमाजस्य साङ्गोपाङ्गं विवरणमस्ति। इह ग्रन्थे गणिकाया मालत्याश्चरित्रमपि वयं विस्तरशो ज्ञातुं शक्नुमः। तस्मिन् पतितालये वृद्धाया गणिकाया उक्तिषु गणिकाजीवनस्य दुरवस्था वर्णिता। तत्र मालती नाम्नी काचिद्गणिका अवर्तत। सा गणिकावृत्तेरुपदेशलाभाय विकरवालानामिकायाः वृद्धायाः सकाशं जगाम। तया विकरवालया समुपदिष्टं सर्वं तथ्यजातं ग्रन्थस्यास्य विषयमूलम्।

भासरचिते 'चारुदत्तम्' इति नाट्ये द्वयोर्गणिकयोर्विवाहका-हिन्युल्लिखिता। एकत्र ब्राह्मणेन चारुदत्तेन समं गणिकायाः वसन्तसेनायास्तथा अन्यत्र ब्राह्मणशर्विलकेन सह गणिकायाः मदनिकायाः अवैधसम्बन्धः सुचारुतया वर्णितः। परम् अत्रोल्लेख्यं यदत्र आर्थिकसम्बन्धो न हि मुख्यः। उभयत्र सम्बन्धे स्निग्धप्रेमैव प्रकाशितं नाट्यकृता।

शूद्रकविरचिते 'मृच्छकटिकम्' इति प्रकरणे नायकस्य चारुदत्तस्य साधारणी स्त्री आसीदेव। तथापि सोऽभूद् वसन्तसेनायामत्यासक्तः। अस्मिन् प्रकरणे गणिका वसन्तसेना स्वस्याः वैभवपूर्णजीवनविधानार्थं परिचितासीत्।

शूद्रको मृच्छकटिके प्रकरणे गणिकाया वसन्तसेनायाश्चरित्रम् उज्ज्वलरूप-रूपेणोपस्थाप्य राजवध्वाः पदमर्यादां ददौ। एतन्न केवलं संस्कृतसाहित्येऽपि तु विश्वस्य सर्वेषु प्राचीनसाहित्येषु विरलमेवासीत्। मृच्छकटिकस्य चतुर्थाङ्के वसन्तसेनाया गृहवर्णनमुपलभ्यते। विदूषकेणोक्तम् 'सत्यं खलु नन्दनवनमिव मे गणिकागृहं प्रतिभासते' (मृच्छकटिकम्, चतुर्थोऽङ्कः)। विदूषकस्य अनयोक्त्यास्माभिः वसन्तसेनायाः वैभवपूर्णजीवनमनुमातुं शक्यते। शूद्रको मृच्छकटिके प्रकरणे गणिकाया वसन्तसेनायाश्चरित्रम् उज्ज्वलरूपरूपेणोपस्थाप्य राजवध्वाः पदमर्यादां ददौ। एतन्न केवलं संस्कृतसाहित्येऽपि तु विश्वस्य सर्वेषु प्राचीनसाहित्येषु प्रविरलमेवासीत्।

विशाखदत्तस्य 'मुद्राराक्षसम्' इति नाटकस्य प्रथमद्वितीयाङ्कयोरेकस्याः विषकन्यायाः कथास्ति। सा विषकन्या नन्दराजस्य मन्त्रिणा राक्षसेन मौर्यसम्राजः चन्द्रगुप्तस्य हननार्थं नियुक्तासीत्। एवञ्च आयुर्वेदकृतः सुश्रुतस्य सुश्रुतसंहितायां (1/6) तस्याः विषकन्यायाः उल्लेखः वर्तते। विषकन्यया सह यौनसंसर्गेण पुरुषः क्षणाभ्यन्तरे म्रियते। विषकन्याः स्वशरीरस्योपभोगनिमित्तं परपुरुषान् प्रलोभयन्ति स्म। तेनैव ताः स्वकार्यसिद्धिं चक्रुः। तस्माद् ते गणिकानार्यः इत्युच्यन्ते। अपि च, (चतुर्थ-पञ्चमशताब्द्योः) तत्कालिकगणिकाभिः नृप-साधारणनागरिकयोरासीत् सम्बन्ध इति परिज्ञायते।

भवभूतेः 'मालतीमाधव'मिति रूपके माधवनाम्ना एको ब्राह्मणः सिंहले व्यापारं कृत्वा धनिकोऽभवत्। अनन्तरं कुवलयावतीनाम्न्यां सुन्दर्यां वारवनितायामासक्तः सन् निर्धनो जातः। ततःपरं तस्याः नासिका-कर्णोच्छेदनं कृत्वा अन्यतमां प्रेमिकां मालतीं समागच्छत्। अपि च, कुवलयावतीनामिकायाः सुन्दर्याः गणिकायाः परिचयो लभ्यते। सा गणिका छलेन ब्राह्मणमाधवस्य सर्वं धनं लुण्ठितवती।

भाणजातीयं साहित्यं मूलतया गणिकानिर्भरम्। स्वाभाविकतया 'चतुर्भाण्यां' प्रियङ्गुषष्टिका, वारुणिका, चतुरिका, रतिसेना, सुनन्दा, मदनसेना चेत्यादिगणिकानां चरित्रमुपवर्णितम्। एवञ्च चतुर्भाणी[18] इति भाणजातीये रूपके वेश्यायाः पर्यायवाचकाः शब्दाः परिदृश्यन्ते, यथा 'पुंश्चली', 'कामिनी', 'बन्धकी', 'वेशयुवतीगणिका', 'वेश्या', 'वेशवधूः', 'मदनदूती', 'चेटिका', 'शम्भली', 'वेशकन्यका', 'पताकायोग्या', 'दासी', 'वारस्त्री', 'कुटुनी' चेति।

बाणभट्टस्य कादम्बर्यां वेश्यानां कानिचन कर्माणि उल्लिखितानि दृश्यन्ते। सोमदेवस्य कथासरित्सागरे एतादृशानां वेश्यानां परिचयः आप्यते, याः गणिकाः स्वाभीष्टं नायकम् अभिलषन्ति स्म। बहुभोग्या इत्येवंरूपेण स्वात्मानं प्रकाशने इच्छा नासीत् तासाम्। अपि च, श्रीधरदासेन तस्य 'सदुक्तिकर्णामृते' काव्ये द्वादशशतकस्य बङ्गदेशीयानां वेश्यानां विवरणं प्रदत्तं - 'वेशः केषां न हरति मनो वङ्ग वाराङ्गनानाम्'। चिन्तामणिभट्ट तायां शुकसप्ततिकथायां आमूलम् अवैधशङ्गाररसोपेतं जर्जरोपाख्यानं गूढ़तया उपनिबद्धम्। तत्रापि शुकपक्षिमुखेन परोक्षतया गणिकाजीवनस्य करुणातिकरुणा जीवनयन्त्रणा अभिव्यक्ता दृश्यते।

भारते विशेषतया मौर्ययुगे तत्परवर्तिनि बौद्धयुगे च तक्षशिलायाम्, उज्जयिन्यां, वैशाल्यां, पाटलीपुत्रे च प्रशिक्षणप्राप्ताः बह्व्यः विषकन्याः आसन्। एतासां प्रसिद्धिः अखिलभारते आसीत्। इदानीन्तनकाले शत्रुभयकारणात् नेतृ-मन्त्रिणश्च च देहरक्षिभिः गमनागमनं कुर्वन्ति, तथैव तत्कालीका राजानो विषकन्यानां भीतिकारणात् विषवैद्येन सह बहिरागमनमकुर्वन्। कौटिल्यः अर्थशास्त्रस्य प्रथमखण्डस्यैकविंशतितमस्याध्यायस्याष्टादशतमे प्रकरणे राज्ञः आत्मरक्षणविषयं तथा सुरक्षाविधानञ्चोल्लिखितवान्।

स्मृति-नीति-कामशास्त्रेषु गणिकायाः स्थानम् -

स्मृतिशास्त्रेषु कामाचारस्य वेश्यावृत्तेश्च बहून्युदाहरणान्युपलभ्यन्ते[19]। समाजस्य परिस्थितिः एतादृशी संकटपूर्णा आसीत् यत् केचन पुरुषाः स्वस्त्रियं वेश्यारूपेण व्यवहृतवन्तः। तदानीम् पुरुषैः अतिथिसत्कारार्थं विविधासु कलासु निपुणाः नार्य्याः व्यवहृयन्ते स्म। इयं प्रथा अन्येषु राष्ट्रेष्वपि प्रचलितासीत्[20]। किन्तु वास्तविकतया इयं परम्परा बहुप्राचीना। विदुषां मते अस्याः परम्परायाः प्रारम्भोऽभूत् राजपुरुषेण। यतो हि एतैः धनवत्पुरुषैः तिरस्कृताः सन्त्यः ताः वेश्यावृत्तिं स्वीकृतवत्यः[21]।

कौटिल्यस्य अर्थशास्त्रस्य सप्तविंशतितमेऽध्याये गणिकाध्यक्षस्योल्लेख-नमाप्यते। गणिकानाम् आयव्ययोः परिगणनमेव एतासां मुख्यं कर्मासीदिति। अर्थशास्त्रे उक्तं यत् कापि गणिका यदि स्ववृत्तिं त्यक्त्वा गच्छति केनापि रोगेण सा म्रियेत, तदा तस्याः दुहिता भगिनी वेति तद्वृत्तिं स्वीकुर्यात्। महामतेः कौटिल्यस्य समये गणिकाः खल्वासन् त्रिविधाः - उत्तम-मध्यम-कनिष्ठभेदात्। गणिकानां रूपं,

देहाकृतिं, वयः तथा ताः कथंकारं पुरुषान् आकर्षयन्ति मनोरञ्जयन्ति चेति सम्यग्रूपेण विचार्य तासाम् उत्तम-मध्यम-कनिष्ठविभागः कौटिल्येन कृतः। विचारस्य दायित्वं केवलमासीत् गणिकाध्यक्षायाः। उत्तमगणिकाः त्रिसहस्रपणात्मकं धनं प्राप्नुवन्ति। मध्यम-कनिष्ठगणिकयोः ते यथाक्रमं द्विसहस्रं एकसहस्रं च पणात्मकं वेतनं प्राप्नुवन्ति।

एतस्माद् ग्रन्थाद् अवगम्यते यत् राजा राजकीयाधिकारीगणिकावंशाद् उद्भूताभ्यः तथा अगणिकावंशाद् उद्भूताभ्यः रूपवतीभ्यः यौवनवतीभ्यः कलासम्मन्नारमणीभ्यः 1000 पणपरिमाणात्मकं प्रतिवत्सरं वेतनं प्रदाय एकां राजगणिकां नियोजितवान्। तस्याः कार्यमुपविभाजनार्थम् एका प्रतिगणिका अपि नियुक्ता। यदि काचिद् गणिका म्रियते वा तद्वृत्तिं त्यक्तुमिच्छति तदा तस्याः कन्यया वृत्तिरियं स्वीकर्तव्या। पूर्वगणिकया त्यक्तायाः सम्पदः प्रभुरपि सा भविष्यति। अन्यत्र यदि मृतगणिकायाः का अपि कन्या भगिनी न विद्यते तदा तयोपार्जितं धनं राजकोषे स्थास्यति।

पुनश्च वात्सायनेन तस्य 'कामसूत्रम्' इति ग्रन्थस्य वैशिकाधिकरणस्य पञ्चमाध्याये त्रिविधानां वेश्यानामुल्लेखः कृतः, - 'त्रिविधा वेश्या - गणिका रूपाजीवा कुम्भदासी च। ताः प्रत्येकमुत्तममध्यमाधमभेदास्त्रिविधाः'[22]। वात्सायनस्य कामशास्त्रेऽप्युक्तं वेश्याजीवनविषये[23]। एवञ्च नीतिशास्त्रेऽपि चर्चितम्-

'राजा वेश्या यमश्चाग्निस्तस्करो वालयाचकौ
परदुःखं न जानाति अष्टमो ग्रामकण्टकः'[24]।।

'गणिकावृत्तिसंग्रहः' एव तस्यैव निदर्शनम्। बौद्धजैनसाहित्ययोः गणिका वृत्तेः प्रभावो विशेषतयालक्षि। बौद्धसाहित्ये परिलक्षितं यत् गणिकायै मालावत्यै तस्याः माता सिरिमा प्रतिरात्रं सहस्रं स्वर्णमुद्राः आनीतवती। समाजातके दृश्यते काश्मीरप्रदेशीयायाः गणिकायाः सामायाः पञ्चशतसंख्यका अनुचारिण्यः आसन्[25]।

राजकार्यस्य प्रयोजनार्थम् उत्कर्षाय च गणिकाः विविधेषु कार्येषु स्वात्मानं नियोजयन्ति स्म। स्वकीयाकर्षणक्षमतानुसारं राज्ञः छत्र-व्यजन-शिविका-पिठिका-रथानां सङ्गिनीरूपेण तासां नियोजनं भवति स्म तदानीम्।

गणिकाप्रधानस्यान्यदेकं कार्यमासीत् गणिकानाम् आय-व्ययपरिगणनमिति। ग्राहकेभ्यो यद्यद्भूषणादिकं लभ्यते तत्तत्सर्वं स्वमात्रे एव

प्रदेयम्। अन्येभ्यो दीयते चेत् प्रायः अर्धांशपणात्मको दण्डो दातव्यः। एवञ्च कापि गणिका यदि ग्राहकान् निन्दति दैहिकनिपीडनादिं करोति च तदा तत्कार्यानुसारेण दण्डः स्वीकरणीयः।

न केवलम् अर्थशास्त्रे, सामाजिकव्यभिचारान्मुक्त्यये मनु-याज्ञवल्क्य-पराशरात्रि-वशिष्ठ-नारदादयः प्रमुख्या ऋषयः विविधोपायैः कौशलपूर्वं यौनाचारं स्वीचक्रुः। तेषां मुनीनां विरचितेषु संहिताग्रन्थेषु वेश्यागमनस्य वेश्यागमनकारिणाञ्च प्रसङ्गे निन्दावाणी समुच्चारिता। किन्तु नारदसंहितायां उक्तं यत् वैश्य-शूद्रश्रेणीयगणिकानां सम्भोगे पापो न सञ्जायते। उच्चजातीयगणिकाभिः सह सम्भोगेन पापाचरणं भवति। अन्यत्र गौतमसंहितायां (17/15) ब्राह्मणानां वेश्यागमनम् अनिन्दितं, किन्तु ब्राह्मणानां तादृशगणिकानां गृहेषु अन्नग्रहणे निषेधोऽस्ति।

पद्मपुराणस्य सृष्टिकाण्डे प्रोक्तं यत् देवासुरयोः युद्धसमये याः नार्यः शत्रुभिः धर्षिताः आसन्, ताः राजप्रासादे ब्राह्मणानां गृहेषु वा गणिकावृत्तिञ्चक्रुः। पुराणस्येयं काहिनी प्रायेण आवहमानकालादेवास्या एव प्रथायाः नियमत्वसम्पादनस्य प्रचेष्टामात्रम् इति वक्तुं शक्यते। द्वादश-त्रयोदशशतकयोः जीमूतवाहेन विरचिते दायभारनामके स्मृतिग्रन्थेऽस्य प्रमाणं विद्यते। उक्तग्रन्थस्य टीकाकारेण महेश्वरेण प्रोक्तं यत् तदानीन्तनकाले धनिनां गृहे परिचारिकापेक्षया यौनपिपासोपशमनार्थं वेश्यानां गुरुत्वमधिकमासीदिति।

प्राचीनभारतवर्षे तदानीं गणिकानां सुरक्षायै शास्त्रकृद्भिर्बहुशश्चिन्तनं विहितम्। तासां कृते सुपरिकल्पिता व्यवस्थासीदिति। समाजे गणिकानां सुस्पष्टं प्राधान्यमासीदिति कृत्वा मनु-वात्सायन-कौटिल्यादिभिः शास्त्रकृद्भिः वाराङ्गना सम्प्रदायभोक्तानां कृते स्वरचितग्रन्थेषु सविशदं तथ्यपुरःसरं विवृतमिति शिवम्।

गणिकाश्रेणीया रमण्यो मादृशरक्तमांसैर्निर्मिता इव। अस्मिन् समाजे सुदीर्घकालं यावत्ताः हीनजातिरूपेण जीवन्ति। गणिकाविषये विविधकालेषु विविधभाषासाहित्येषु बहवः ग्रन्थाः रचिताः। तेषु ग्रन्थेषु तासां जीवनवैचित्र्य-सामाजिकावस्थान-सामाजिकावक्षयाः उद्धृताः। अस्माभिः गणिकानां समाजदृष्ट्या हीनास्पदं, घृण्यम्, अस्वच्छं, कुत्सितं, जीवनयापनं व्यक्तीकृतम्। बहुषु क्षेत्रेषु समाजस्य सन्दूषणकरणे गणिकानामुपरि दोषारोपः क्रियते। किन्तु एताः गणिका

अपि मनुष्या इति भाव्यम्। तास्वपि मनुष्यत्वं, जीवनपीडा, व्यथा, वेदना, सांसारिकी आकाङ्क्षा, अन्यबालिकावत् स्वाभाविकजीवनयापनस्याधिकारः, स्वप्नदर्शनाधिकारश्चेति विद्यन्ते। एते विषयाः प्राचां साहित्यिकानां रचनायां प्रायो न प्राधान्यं लभन्ते। आङ्गलसाहित्ये बङ्गसाहित्ये चोच्चचिन्तनं वास्तविकजीवनञ्च सम्यगुरूपेण चित्रितमस्ति। पूर्वोक्तालोचनात् एतदेव प्रतीयते यत् सुप्राचीने भारते गणिकासम्प्रदायस्य मर्यादा स्थितिश्च अवश्यमेवोच्चकोटिकासीत्। चिन्तयन्तु भवन्तः सहृदयपाठकाः! समाजे तासां भूमिका गुरुत्ववहा नासीच्चेत्तर्हि कथमपि वात्सायनादिवच्छास्त्रकाराः गणिकाजीवनमाश्रित्य स्वस्वशास्त्रग्रन्थस्यैकस्मिन् प्रकरणे विस्तरशः नालोचनञ्चक्रुः। किञ्च, ख्रीष्टपूर्वशताब्दीतः कथं ख्रीष्टीये संस्कृतसाहित्ये वाराङ्गानामवस्थानं परिवर्तितं तथा वर्तमानसामाजिकदृक्कोणतः वर्तमानसंस्कृतकवयः अपि तेषां कृतिषु गणिकानां स्थानं प्रादुः चेति निश्चप्रचं शक्यवचम्। परम् अवश्यमेव आर्थसामाजिक दृष्ट्या तासां स्थितिर्नासीदुच्च-कोटिका परं सहृदयदिशा तासां महत्त्वं बभूवेति वक्तुं शक्यत इति शम्।

सन्दर्भाः

सन्दर्भ ग्रन्थसूची

*क). **प्राथमिकोत्साः (Primary Source in Bengali & Sanskrit) :***

1. *अथर्वेदसंहिता (सटिप्पन्या आंलानुवादः) (तृतीयः खण्डः). डब्ल्यु. डि. हुइटनी, (सम्पादकः संशोधनाकारः) के.एल.जोशी, परिमलपब्लिकेशन, दिल्ली, 2015।*
2. *ऋग्वेदसंहिता (भागः 4). (सम्पा.) एन.एस.सोनटाक्के, सिजि काशिकार च, वैदिकसंशोधनमण्डलम्, पुणा, 1946 (प्रथम प्रकाशन)।*
3. *कामसूत्रम् (श्रीवात्स्यायनमुनिप्रणीतम्). (सम्पा.) पारसनाथद्विवेदी, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2014।*
4. *कुट्टनीमतम् (दामोदरगुप्तकविविरचितम्). अनुवादकः अध्यापको त्रिदिवनाथ-रायः, वसुमती साहित्यमन्दिरम्, कलिकाता, 1360 प्रथमसंस्करणम्)।*
5. *भरतनाट्यशास्त्रम् (प्रथम-द्वितीय-तृतीय-चतुर्थखण्डाः). (सम्पा.) सुरेशचन्द्र वन्द्योपाध्याय, नवपत्र प्रकाशन, कलकाता, 2014 (षष्ठ मुद्रण)*

6. *मनुस्मृतिः (ब्रह्मकृता मनुप्रोक्ता भृगुप्रचरिता). (सम्पा.) शिवराज आचार्य कौण्डिन्न्यायन, चौखम्बा विद्याभवनम्, वाराणसी, 2010 (प्रथमसंस्करणम्)।*

7. *महाभारतम् (श्रीकृष्णद्वैपायनवेदव्यासविरचितम्). (सम्पा.) हरिदास-सिद्धान्तवागीशः, विश्ववाणी प्रकाशनम्, कलकाता, 1383 बङ्गाब्दः (द्वितीयसंस्करणम्)।*

8. *मृच्छकटिकम् (शूद्रकविरचितम्). (सम्पा.) अविनाशचन्द्र दे ओ शुभेन्दुकुमार सिद्धान्त, संस्कृत पुस्तक भाण्डारः, कलकाता, 1413 बङ्गाब्दः (द्वितीय संस्करणम्)।*

9. *रामायणम् (वाल्मीकिः). (तिलकादिव्याख्याचतुष्टयोपेतम्), (सम्पा.) क्षेमराज श्रीकृष्णदासः, राष्ट्रियसंस्कृतसंस्थानम्, न्यू दिल्ली, 2005।*

10. *सदुक्तिकर्णामृतम् (श्रीश्रीधरदासकृतम्). (सम्पा.) रामावतार शर्मा, एशियाटिक सोसाइटि अफ वेंगल, कलकाता, 1921।*

11. *साहित्यदर्पणः (श्रीविश्वानाथकविराजकृतः). (सम्पा.) विद्यावाचस्पति-साहित्यचार्य-शालिग्रामशास्त्री, मोतीलाल बनारसीदास, दिल्ली, 2004।*

ख). सहायकग्रन्थसूची (Secondary Sources) :

1. *चट्टोपाध्याय, दुर्गापद. संस्कृतसाहित्ये वाराङ्गना, सुवर्णा प्रकाशनी, कलिकाता, 1998 (प्रथम प्रकाशन)।*

2. *दास, करुणासिन्धु. संस्कृत विद्यार नाना प्रसङ्ग, संस्कृतपुस्तक् भाण्डारः, कलकाता, 2004।*

ग). अन्तर्जालेन प्राप्तानां तथ्यानाम् उत्सः :

- Shaw, Shalini, (April, 2002). Prostitution in Classical Sanskrit Literature from the Seventh to the Thirteenth Centuries, 'The Medieval History Journal', https://journals.sagepub.com › doi › pdf-
- Sinha, S.N. and N.K.Basu (1994).History of Prostitution in India.Kolkata.
- https://www.academia.edu(Academia-edu)
- https://www.britannica.com (Britannica)

सन्दर्भाः -

1. *'त्रिविधा वेश्या एकपरिग्रहा अनेकपरिग्रहा अपरिग्रहा चेति' (कामसूत्रम्, वैशिकाधिकरणम् प्रथमं वृत्तम्)*
2. *कामसूत्रम्, (नवपत्र प्रकाशन), सूत्रम् (3/5/27)*
3. *दशरूपकम् (2/11)*
4. *साहित्यदर्पणः (वृत्तिः)*
5. *कामसूत्रम् (नवपत्र प्रकाशन) (1.3.2)*
6. *ऋग्वेदः (वैदिक संशोधन मण्डल) (1.128.5)*
7. *पतितावृत्तिर उत्स सन्धाने, राना चक्रवर्ती, लिटलम्याग आनएडिटेड, 25 एप्रिल,1999*
8. *ऋग्वेदः (हरफ प्रकाशनी), (1.167.4)*
9. *ब्रह्मवैवर्तपुराणम् (प्रकृतिखण्डः, अध्यायः 227-228)*
10. *महाभारतम् (8.30.57-59)*
11. *तत्रैव (115-39)*
12. *महाभारतम् (उद्योगपर्व, 30.38, 86.15)*
13. *तदेव (151.58)*
14. *नारदस्मृतिः, (वेतनस्यानपाकर्म 18)*
15. *धम्मपद, पृ. 197*
16. *ललितविस्तरम्, (पृ. 156), नाट्यशास्त्रम् (अध्यायः - 23)*
17. *मेघदूतम् (पूर्वमेघः) - 26*
18. *संस्कृत साहित्य सम्भार (षोडश खण्ड), पृ.- 249*
19. *मनुसंहिता (4.209)*
20. *Molennan : Primitive Marriage, page – 96*
21. *Barua : Introduction of history of Indian Prostitution (Sinha and Basu).*
22. *कामसूत्रम् (28, वृत्तिः)*
23. *तत्रैव (1.5.6)*
24. *चाणक्यनीतिसारः (18.19)*
25. *जातकम् (3.59-63)*

4

संस्कृतकाव्यवाङ्मये पर्यावरणसुरक्षाप्रसङ्गे एका समीक्षा

भोलेश्वर प्रधानः

प्रस्तावना -

भारतीयसंस्कृतौ प्रकृतेः तथा पर्यावरणस्य स्थानं सातिशयमहत्त्वपूर्णम्। प्रकृतेः समाकर्षणेन मनुष्यः विषादरहितः सन् आनन्दसागरे भ्रमित। कवयः महाकवयोऽपि प्रकृतेः तथा पर्यावरणस्य प्रेरणाया स्वात्मनं नियुज्य सहृदयहृदयश्लाध्यरूपाणि काव्यानि महाकाव्यानि च विरचितानि सन्ति। प्रकृत्या सह मानवः अङ्गाङ्गित्वेन संयुक्तः भवति। पर्यावरणस्य विपर्यात् अस्माकं जीवमण्डले जीवनधारणं न सम्भवेत्। सम्प्रति प्रतिकूलपरिवेशकारणात ऋतुचक्रस्य वैषम्यता संदृश्यते। अकाले वृष्टिपातः, वज्राघातः, जलप्रलयः, प्रचण्डग्रीष्मातपः, संक्रामकरोगस्य उत्पीडनश्च समग्रविश्वे दृश्यते। वैश्विकपर्यावरणस्य परिवर्त्तनमनुभूय राष्ट्रनेतृवर्गाः सम्मेलनं विधाय नीतिनिर्द्धारणं कुर्वन्ति, परन्तु समस्ताः योजनाः विफला भवति। अस्मिन्नेव विज्ञानयुगे विकासधिया मनुष्याः अधोमुखं गच्छन्ति। विलासव्यसननिमित्ताय मनुष्याः नानाशिल्पाञ्चलाः विनिर्मिताः सन्ति। राष्ट्रसुरक्षा-छलेन परमाणुः क्षेपणास्त्रं च निर्माय परीक्षायै समुद्रे आकाशमार्ग च निक्षिपन्ति मोहग्रस्ताः वेज्ञानिकाः। यस्मात् कारणात् भूमि-जल-वायु-आकाश-वनानि च प्रदूषितानि भवन्ति। एतस्य पर्यावरणस्य सुरक्षार्थ के के उपायाः अवलम्बनीयाः अधस्तात् मया वर्ण्यते।

वैदिकग्रन्थे पर्यावरणसुरक्षा -

ऋग्वेदे पृथिवी-अन्तरिक्ष-जल-अग्नि-वायुनां शान्तये स्वस्तिवाचनं भवित। पृथिवीशान्त्यर्थ ''शं न उरूची भवतु स्वघाभिः''[1], अन्तरीक्षशान्त्यर्थ ''शमन्तरिक्षं –दृश्येनो अस्तु''[2], ''जलशान्त्यर्थ शं नः सिन्धवः शमु सन्त्वापः''[3],

''अग्निशान्त्यर्थं शं नो अग्निज्योतिरनीको अस्तु''[4], ''वायुशान्त्यर्थं शं न इषिशे अभिवातु वातः''[5] च मन्त्राः सन्ति ।

पर्यावरणस्य स्थैर्यताविषये प्रतिपादनं ऋग्वेदे मृत्युसूक्ते भवित । यथा –

सूर्य चक्षुर्गच्छतु वातमात्मा
द्यां च गच्छ पृथिवीं च धर्मणा।
अपो वा गच्छ यदि तत्र ते हित-
मोषधीषु प्रति तिष्ठा शरीरैः।।[6]

अर्थात् हे मृतमानव ! ते चक्षुः सूर्यं गच्छतु, आत्मा वायवे अन्तर्भवतु, पुण्यकर्म नाकलोकं प्रयातु, जलं पृथिव्यां समापयतु येन ते कल्याणं भविष्यति। अपि च सूक्ष्मशरीरपेण औषधीवृक्षेषु जन्म नयतु।

काव्येषु पर्यावरणसुरक्षा -

पञ्चमहाभूतेषु एव अस्माकं शरीरं विनिर्मितं भवति। शरीरे मेदादारभ्यः रक्तं यावत् सर्वाणि तत्त्वानि पञ्चमहाभूतेभ्यः सम्भविन्त। यदि पञ्चमहाभूतानां विपर्ययः असन्तुलनं भवति तर्हि जीवजगद नानारोग्रस्तः सन् विनाशपथं गमिष्यति। एतस्मिन् विषये महाभारते वर्णितं भवति। भू-अग्नि-आकाश-जलतत्त्वेभ्यः शरीरं, कानि कानि तत्त्वानि कस्मात् सम्भवित तान्येव अधस्तात् दीयते।

पञ्चमहाभूतानि -

भूमिरापस्तथा वायुरग्निराकाशमेव च।[7]
ते एते धातवः पञ्च ब्रह्मा यानसृजत् पुरा।
आवृत्ता यैरिमे लोका महाभूताभिसंज्ञिताः।।[8]

पृथिवी -

त्वक् च मांस तथस्थिनि मज्जा स्नायुश्च पञ्चमम्।
इत्येतदिति संघातं शरीरे पृथिवीमयम्।।[9]

अग्निः -

तेजो ह्यगिस्तथा क्रोधश्चक्षुरूष्मा यथैव च।
अग्निर्जरयते यश्च पञ्चाग्नेयाः शरीरिणः।।[10]

आकाशः -

श्रोतं ग्राणं तथाऽऽस्यं च हृदयं कोष्ठमेव च।
आकाशात् प्राणिनामेते शरीरे पञ्चधातवः।।[11]

जलम् -

श्लेष्मा पित्तमव्य स्वेदो वसा शोणितमेव च।
इत्याप पञ्चधा देहे भवन्ति प्राणिनां सदा।।[12]

पर्यावरणे वायुस्थानम् -

वायुं बिना भूमण्डले प्राणीनां जीवनधारणं न सम्भवति। परन्तु विज्ञानोन्मुखिमनुष्याः विकासछलेन अधोमुखं गच्छन्ति। वायुमण्डलं क्रमशः दूषिताभिमुखे गच्छति। अम्लजानस्य अवक्षयः, अङ्गारकाम्लप्रभृतयः दूषितवायवः वृद्धि प्राप्नुवन्ति। यस्मात् कारणात् जन्तवः दूषितवायुं श्वासरूपेण जग्राह्य नानारोगग्रस्ताः भवन्ति। एतस्मिन् विषये आह्वानमिति कविः कवयित -

प्रधावन्त्य ये भूतले चान्तरिक्षे
वमन्ति प्रधूमं ध्वनिं वाहनानि।
भवत्यामयावी तयोः प्राणिवर्गः
प्रदोषावहं जीवनं सर्वमेव।।[13]

पर्यावरणे वृक्षस्थानम्

महाभारते महर्षिव्यासदेवः भरद्वाज-भृगुमहर्षयोः कथोपकथनप्रसङ्गे वृक्षमहत्त्वं प्रतिपादयित। यथा -

एतेषां सर्ववृक्षाणां छेदनं नैव कारयेत्।
चतुर्मासे विशेषेण विना यज्ञादि कारणात्।।

अर्थात् एतेषां सर्वविधानां आम्रपनसवटपिप्पलादिवृक्षाणां छेदनं न कारयेत्। यज्ञादिविशेषकार्यवशादेव वृक्षछेदनं कुर्यात्। विशेषत्वेन वर्षत्तुकाले चातुर्मासं यावत् वृक्षछेदनं न विधेयम्। कारणं भवित वृक्षः मनुष्यसदृशः जीवनं यापयति। अपरे मत्स्यपुराणेऽपि वृक्षस्य माहात्म्यं वर्णितं भवाते। यथा -

दशकूपसमा वापी दशवापीसमो ह्रदः।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः।। [14]

प्रकृतेः समुपासकः महाकविकालिदासोऽपि अभिज्ञानशाकुन्तले पतिगृहगमनावसरे शकुन्तलाविच्छेदेन दुःखितः सन् पाण्डुपत्रमोचनछलेन वृक्षाः क्रन्दन्तीति वर्णयति । यथा –

उद्गीर्णदर्भकवला मृग्यः परित्यक्तनर्त्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः।।[15]

पञ्चभूततत्त्वानि अनुभवति वृक्षः। स्थावरोऽपि वृक्षः उष्णतः पर्णमलिनत्वेन स्पर्श, वायुरग्निवज्रादिशब्दैः विशीर्णत्वेन श्रवणं, लतानां वृक्षवेष्टन-गमनत्वेन दर्शनं, विविधैः गन्धधूपैः पुष्पनिरोगत्वात् घ्राणं, पादैः सलीलपानात् व्याधिदर्शनात् च रसनं वायुग्रहणं, सुखदुः खग्रहणात् छिन्नस्थानस्य विरोहणात् चेतनतां च अनुभवति।

अष्टप्रकृतिरूपधरः शिवः -

अभिज्ञानशाकुन्तलनाटकस्य नान्दीपद्ये नाट्यकारकालिदासः अष्टमूर्त्तिधरस्य शिवस्य स्तुत्यवसरे क्षिति- अप्-तेज-वायुराकाशानां पञ्चमहाभूतानां, सूर्यचद्रादीनां च वर्णनं विहितवान्। अर्थात् एतेषाम् अष्टतत्त्वानां रूपं भवित शिवः। अत्र परोक्षरूपेण जगज्जनान् कविः शिक्षयित पृथिव्यादितत्त्वरूपस्य पर्यावरणस्य सुरक्षा कर्त्तव्या। येन अस्माकं जीवनं सुखमयं च भवेत् । श्लोकः यथा -

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्ववीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।[16]

पर्यावरणे पर्वतस्थानम् -

पृथिवीमातुः भारसाम्यरक्षणाय हिमालय-कैलास-सुमेरूप्रभृतयः पर्वताः भूमण्डले भान्ति। तानेव पर्वतान् कवयः महाकवयश्च देवतापेण वर्णयन् तेषां सुरक्षायैः अस्मान् प्रेरयन्ति। महाकविकालिदासः सप्तदशसर्गात्मके कुमारसम्भवमहाकाव्ये देवतात्मनः हिमालयस्य माहात्म्यम् अतिविस्तरत्वेन वर्णितवान्। तत्र बह्वौषधयः संगच्छिताः सन्ति। याः औषधीन् सर्वमानवाः रोगाद्विमुक्तये सुखमयजीवनधारणाय च सेवनं कुर्वन्ति।

यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम्।।[17(क)]

मेघदूते पूर्वमेघऽपि कुवेरशापात् पत्निविच्छेददुःखानुभवता यक्षमुखेन रामगिरिं मेघसखारूपेण वर्णयति। अस्मात् ज्ञायते महाकविः प्रकृतिसुरक्षायै तत्परोऽभूत्। कैलास- देविगिरिकनखलादीनां पर्वतानां वर्णनछलेन तेषां सुरक्षानिमित्ताय अस्मान् प्रेरयित। श्लोकर्यथा -

तस्य स्थित्वा कथमपि पुरः केतकाधानहेतो-
रन्तर्वाष्परमनुचरो राजराजस्य दध्यौ।
मेघालोके भवित सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनिजने किं पुनर्दूर संस्थे।।[17 (ख)]

महाकविर्माघविरचित शिशुपालवधमहाकाव्ये चतुर्थसर्गे श्रीकृष्ण-मुखेनरैवतकपर्वतवर्णनं कृतवान्। यस्य शोभावर्णनछलेन अस्मान् तत्सुरक्षायै संप्रेरयति। श्लोकर्यथा -

आच्छाद्य पुष्पपटमेव महन्तमन्त-
रावर्तिभिगृहकपोतिशरोधराभैः।
स्वाङ्गानि धूमरूचिमागुरवी दधानै-
र्धूपायतीव पटलैर्नवनीरदानाम्।।[18]

रामायणप्रभृतिग्रन्थेष्वपि महेन्द्रप्रभृतयः पर्वताः देवपर्वतरूपेण वर्णिताः भवन्ति। अतः वयं सर्वे पर्वतानां सुरक्षायै कार्यं कुर्मः।

पर्यावरणे नदीस्थानम् -

'जलमेव जीवनम्' इति न्यायेन जलं विना जीवजगत् न स्थास्यते। अमृतमयं जलं निपीय आत्मसन्तुष्टिमनुभवन्ति। वैदिककालादेव गङ्गा-यमुना-सरस्वतीप्रभृतिनां नदीनां माहात्म्यं विभिन्नेषु ग्रन्थेषु दृश्यन्ते। याः नद्यः सकल-भूमण्डलस्य जीवनधाराः भवन्ति। पवित्रतमायाः गङ्गायाः जलं निपीय रोगग्रस्ताः जनाः रोगमुक्ताः अभवन्। परन्तु ताः नद्यः सम्प्रति प्रदूषिताः पङ्कयुक्ताश्च। प्रो. हरेकृष्णशतपथीमहोदयः स्वरचिते गङ्गाजलदूषितकाव्ये गङ्गायाः माहात्म्यवर्णनपूर्वकं दशा वर्णयति स्म। यथा -

गङ्गा पुण्यजला स्वकीर्त्तिधवला नित्यं तरङ्गोज्ज्वला
विष्णुश्रीचरणाब्जरेणुविमला श्रीशम्भुशीर्षस्थला।
विश्व प्राणकला भगीरथतपः सम्पूतवेलाकुला
सा ङ्गगा मलिना विसन्नसलिला पङ्काकुला व्याकुला।।[19]

महाकविकालिदासः स्वरचिते मेघदूते खण्डकाव्ये गङ्गा[20]- सरस्वती[21] सिप्रा[22] प्रभृतीनां नदीनां वर्णनं सातिशयसौन्दर्यतया कृतवान्। नाट्यकारभवभूतिरपि उत्तररामचरितनाटके गङ्गा-तमसा-मूरलानदीनां माहात्म्यं वर्णयति स्म।

आचार्यभोजराजोऽपि चम्पूरामायणे ङ्गगायाः[23] माहात्म्यं वर्णयति। पण्डितराजजगन्नाथः स्वकीये गङ्गालहरीकाव्ये भागिरथ्याः महत्त्वं विशदयति।

उपसंहारः –

वहुविधदर्भिक्ष-महारोग-प्राकृतिक विपर्ययानां मूलकारणं भवित मनुष्यः। अतः विश्ववासिनः एकत्रीभूयः ''वसुधैवकुटुम्बकम्'' इति सूत्रेण निबद्धः सन्तः पृथिवी-तेज-जल-वायु-आकाशादीनां पञ्चमहाभूतानां, गङ्गाप्रभृतिनदीजलानां विशोधनं च कुर्युः। नानाखनिजद्रव्य-रत्नलोभेन पृथिव्याः खननं भवित। पर्वतानां गर्भदेशं खननकारणात् प्राकृतिकविपर्ययः तथा औषधीनां विनाशः भवित। अतः हे विश्ववासिजनताः! वयं सर्वे कायमनोवाक्येन ऐक्यभावं निवहन् पर्यावरणसुरक्षार्थ कार्यं कुर्मः। यदि एवं न भवेत् तर्हि सर्वे करोनासदृशसक्रांमकरोग द्वारा पीडितो भूत्वा मृत्युमुखं गमिष्यामः।

अन्ते च भगवतः नीलाद्रिनाथस्य श्रीजगन्नाथस्य तथा जगज्जनन्याः तारिणिदेव्याः पादपयोयुगले सभत्तिकं स्वात्मनं समर्प्य विरममि विस्तरात् इति।

।। शम् ।।

सन्दर्भाः-

1. *ऋग्. 7/35/3*
2. *ऋग्. 10/35/5*
3. *ऋग. 7/35/8*
4. *ऋग्. 7/35/4*
5. *ऋग्. 7/35/4*
6. *ऋग्वेदः मृत्युसूक्तः*
7. *महा. भीष्म (5/4)*
8. *महा. शान्ति (184/1)*
9. *तत्रैव (184/20)*
10. *तत्रैव (184/21)*
11. *तत्रैव (184/22)*
12. *तत्रैव (184/23)*

13. आह्यवानम् (47/4)

14. मत्स्य (154/592)

15. अभि. (4/11)

16. अभिज्ञान (नान्दी - 01)

17. (क) कुमार (01/02)

(ख) मेघदूते (पूर्व-03)

18. शिशु (4/52)

19. गङ्गाजल. 01

20. मेघदूते (पूर्व-53)

21. मेघदूते (पूर्व-52)

22. मेघदूते (पूर्व-32)

23. चम्पूरामायणम् (बाल-54)

5

भारतीयशिक्षा, उत्तमदीक्षा

सुकदेव वाजपेयी

वेदस्य षडङ्गानि सन्ति - शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषमिति। तेषु शिक्षा सर्वप्रथमा। सामान्यदृष्ट्या शिक्षाशब्दस्यार्थोऽत्र उच्चारणविज्ञानम् श्रुतिमाधुर्यस्य सिद्धान्त इति विद्यते। स्वरवर्णाद्युच्चारणप्रकारो शिक्ष्यते यत्र सा शिक्षा इत्युपनिषदि। परमेतद्विज्ञानं सिद्धान्तो वा न केवलं मौखिकमधुरतायां अथवा शाब्दिकोच्चारणे च सीमिता अपितु शब्दानां ध्वनीनां स्वराणां, स्पष्टतायाः मधुरतायाः अन्तर्गता पवित्रता, ऋजुतापि तथैव आवश्यकी यथा सुस्वाद्वर्थं सूपे लवणम्, पुष्पे गन्धं च। ऋजुता चायं शब्दः सारगर्भितः यस्मिन् सरलता, स्पष्टवादिता, सत्यसन्धातृत्वम्, सत्पथगामिता इत्यादयः गुणाः सन्निविष्टाः भवन्ति। शिक्षा नाम सा न भवति या भाषणम् उच्चारणं च शिक्षयति अपितु या सत्याचरणमपि अभिव्यनक्ति सा शिक्षा। ऐतरेयोपनिषदि प्रार्थ्यते -

वाङ् मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठिता। आविरावीर्म एधि। वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीः। अनेनाधीतेनाहोरात्रन् सन्दधामि ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु । अवतु माम्, अवतु वक्तारम्।[1]

अर्थात् वाक् मम मनसि प्रतिष्ठिता स्यात् मम च मनः मे वाण्यां प्रतिष्ठितं स्यात्। भवान् च ईशः! अस्मिन् शिक्षास्थले, मम मनसि मम वाचि च मह्यं दर्शनं देहि। मया अर्जिता शिक्षा नष्टा न भवेत्, व्यर्था न भवेत्। अनेन अध्ययनेन अहमहरहः स्वोन्नतिं कुर्याम्। अहं न्यायानुकूलं धर्मानुकूलं सत्यानुकूलं वचनं वदिष्यामि, तद्वचनं धर्मश्च मां रक्षेदिति भावः। अस्यां प्रार्थनायां यदि वयं विचारयामश्चेत् सम्पूर्णराष्ट्रस्य मूल्यपरकं शिक्षादर्शनमिह प्राप्स्यति नात्र

विस्तरणीयम्। उच्चारणविज्ञानविषये तावत् विचारणीयम् यदुच्चारणपदस्य कः अर्थः? उदुपसर्गपूर्वकचर्धातोः ल्युट्प्रत्यये कृते निर्मित-उच्चारणशब्दस्य भावनास्ति मनसि निहितविचारः, उद्गारः, यदा शब्दाकृतिं गृहीत्वा कण्ठान्निःसरन् मुखस्य विभिन्नस्पर्शस्थलान् स्पृशन् हृदयाद्बहिः आयान्ति तर्हि तेषु प्रामाणिकता सत्यवादिता च अवश्यमायाति, अर्थात् वयं यद्वदामः तन्मधुरं स्यात् तच्च माधुर्यं हृदयाभिव्यक्तिर्भवेत्। हृदि कटुत्वं निधाय वाचि माधुर्यं तथैव स्यात् यथा तुलसीदासेनोक्तम्-

मन मलीन तनु सुन्दर कैसे। विषरस भरा कनक घट जैसे।

शिक्षाशब्दस्यार्थो भवति विनम्रता शालीनता। नीतिशतकस्येदं वचनं प्रसिद्धम्-

विद्या ददाति विनयं विनयात् याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मस्ततः सुखम्।।[2]

वस्तुतः स एव शिक्षितः मानवः, यः विनयी, शालीनश्च विद्यते। विद्यावानेव रूपवान् भवति विद्यातिरिक्तं रूपं निर्गन्ध किंशुक इव भवति - रूपयौवनसम्पन्ना विशालकुलसंभवाः। विद्याहीनाः न शोभन्ते निर्गन्धा इव किंशुकाः।। विद्या एव सर्वेषु जनेषु पूज्यते। विद्वानेव च सर्वत्र देशे विदेशे पूज्यते, विद्या एव भोग्यदायिनी सुखदायिनी यशःदायिनी, प्रतिष्ठादायिनी च विद्यते -

विद्या नामनरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्,
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता,
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।।[3]

अतः विद्या एव मनुष्यस्य सर्वस्वं विद्यते। विद्या एव विद्यावतां पूज्या देवता। विद्या अस्ति चेत् मनुस्यास्तित्वमपि। नोचेत् स तु पृथिव्यां भार इव - 'ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाश्चरन्ति'। अपि च भारं वहन् गर्दभसमानः-**यथा खरश्चन्दनभारवाही भारस्य वेत्ता न तु चन्दनस्य।**[4] रामचरितमानसे महर्षिवसिष्ठः श्रीरामस्य चरित्रसम्बन्धे कथयति - नीति प्रीति परमारथ सवारथु। कोउ न राम सम जान जथारथु। अर्थात् परमार्थस्य स्वार्थस्य, नीतेः प्रीतेश्च यथार्थं यज्ज्ञानं रामे विद्यते नान्यस्मिन्। आचार्यद्वारा निजशिष्यस्य संस्तुत्यानया किमतिशिष्यते? औपनिषदिकभाषायां वक्तुं शक्यते यत् पराविद्याम्, अपराविद्यां,

विद्यामविद्यां च यो जानीते स एव शिक्षितः। सः संसारे अपराविद्यया दक्षतापूर्वकं सफलतापूर्वकं जीवनं यापयित्वा पराविद्याश्रयेण मोक्षसुखमवाप्नोति-

विद्यां चाविद्यां यस्तद्वेदोभयं सह।

अविद्यया मृत्यु तीर्त्वा विद्ययाऽमृतमश्नुते।।'[5]

श्रेष्ठ-नैतिक-जीवनाय ये मूल्याः आवश्यकाः तेषामुल्लेखः प्रायः सर्वेषु धर्मेषु सम्प्रदायेषु विद्यत एव तान् मूल्यान् केन्द्रीकृत्य शिक्षायाः स्वरूपः निर्धारणीयः। दुर्भाग्यवशात् साम्प्रतं अद्यतनीयायां शिक्षाव्यवस्थायां तेषां मूल्यानां सर्वथा अभावो दरीदृश्यते। अथवा पश्यन्नपि पश्यति समाजः। शिक्षा नाम सा यस्यां व्यक्तित्वस्य सांसारिकविकासः पारमार्थिकश्च विकासः स्यात् अपि च नैतिक-आध्यात्मिक-आर्थिक-धार्मिकादिसम्पादनप्रयासाय ऋजुता सरला स्पष्टवादिता सत्यसन्धता मनुजेषु स्यात्। व्यवहारे आचरणे सत्यस्याश्रयः, प्रामाणिकता वा स्यात्। बाह्यमान्तरिकं च पावित्र्यम् येन स्यात्। वेदे ऋतशब्दस्य प्रयोगः अस्ति ऋतमिति यदनृतं नास्ति सत्यमेव जयते नानृतम् इति वाक्यानुसारं यस्य ऋतं नास्ति तस्य नास्ति विजयः। तस्य ऋतस्य प्राप्तिः शिक्षयैव सम्भवा। शिक्षावान् विद्यावानेव सत्यं जयति ऋतं जयति।

अपि च - शिक्षितः मनुष्यः सामाजिकः भवति समाजं प्रति तस्य किं कर्त्तव्यम्, यस्मिन् समाजे सः निवसति सः सुखी कथं च स्यादिति विचारः सर्वदा करणीयः। यथा च वेदोक्तिः-

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।

देवा भागं यथा पूर्वे सं जानाना उपासते।।

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।

समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि।।

समानीव आकूतिः समाना हृदयानि वः।

समानमस्तु वो मनो यथा वः सुसहासति।।[6]

सर्वे सामाजिकाः जनाः संगच्छेरन्, संवदेरन् सर्वेषां मनः समानं स्यात्, सहमतिः, समानं च सर्वेषां चित्रं स्यात्। मनसा वाचा कर्मणा च सर्वेषां ऐक्यं स्यात्। समता समानता समरसता च इत्यत्र सर्वैः ध्यातव्यम्। भेदाभेदभावनां दूरादेवास्पर्शनम्। परस्परप्रतिस्पर्द्धाभावना सत्कार्येषु स्यान्नासत्कार्येषु। यदा

एतादृशानि आचरणानि सर्वेषां भवन्ति तदैवेयं वसुधा सर्वान् कामान् दोग्धि। अथर्ववेदे प्रोक्तम्-

सत्यं बृहदृतमुग्रं दीक्षा तपो बह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु।।[7]

अर्थात् सत्यम्, उग्रम् ऋतम्, दीक्षा, तपः, यज्ञः, एतानि पृथिवीं धारयन्ति। दीक्षायाः अर्थः समर्पणम्। तपसः अर्थः- सुखदुःखादिद्वन्द्वसहनसामर्थ्यम्, ब्रह्मचर्यावस्थायां संयमप्रधानं जीवनम् , न स्वैरी, नानाहिताग्निः इत्यादिकं तपोऽर्थः अर्थात् ब्रह्मचर्यमेव तपः। अमेरिका शिक्षाविद् विलियम हैरिसः कथयति यत्- येन व्यक्तिगत-सुखकर्मणा सह सामाजिक-व्यवस्थामंगीकरणम्, तदेव तपः, अर्थात् शाश्वतस्वतन्त्रतायै क्षणिकस्वतन्त्रतायास्त्यागः। स्वाध्यायस्य तात्पर्यं मननम्, चिन्तनम् आचरणपूर्वकमध्ययनम्-श्रवणम्, मननम् निदिध्यासनमिति। तैत्तिरीयोपनिषद्युक्तम् - स्वाध्यायान्मा प्रमद इति। यज्ञस्य भावः त्यागभावनया संग्रहः। कालिदासेन रघुवंशिराज्ञां कृते उक्तम् - त्यागाय संभृतार्थानाम्। निजावश्यकता यावद्वस्तुना पूर्यते न तस्मादधिकमच्छेदिति, जैनधर्मे एतदपरिग्रहशब्देन विशिष्यते। राष्ट्रहिताय, समाजहिताय, दानमिति भावः- इदं राष्ट्रय इदं न मम। एष एव यज्ञः। एतद्वैशिष्ट्यं पृथिवीं धारयति। एतद्गुणधातृभिः मनुजैः अयं संसारः पुण्यमये पथि संसरति। नैतावदेव माता भूमिः पुत्रोऽहं पृथिव्याः इत्यपि भावना मनसि सर्वेषु स्यात्। एतां भावनां हृदि निधाय सर्वदा मातृभूमेः कृते समर्पणयज्ञोऽपि मनुजैः विधातव्यः। भारतीयशिक्षा मनुष्यस्य सर्वं विकासयति, व्यष्टितः समष्टिं यावत् तस्याः औन्नत्यदृष्टिर्भवति, अतः सा मनुष्यस्य आत्मिकोन्नत्या सह सामाजिकोन्नतिं प्रति सदा सजगा भवति। तैत्तिरीयोपनिषदि **मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव**[8] इत्यादिवचनैः माता-पिता-आचार्यातिथीनां देवत्वं विधाय तेषाम् आदरं सम्मानं शुश्रूषत्वं च शिक्षयति अस्माकं भारतीया पारम्परिकी शिक्षा। अथर्ववेदस्य पैप्पलादशाखायाम् -

अनुव्रतः पितुः पुत्रो मात्रा भवतु संयतः।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्।।
मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।
सम्यंचः सव्रताः भूत्वा वाचं वदत भद्रया।।

येन देवा न वियन्ति नो च वि द्विषते मिथः।
तत्कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः।।
ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयनतः सुधराश्चरन्तः।
अन्योन्यस्मै वल्गु वदन्तो यात समग्रास्थ साध्रीचीनान्।।[9]

एषु मन्त्रेषु पारिवारिकमूल्यं प्रति तटस्थीकरोति ऋषिः। अत्रोक्तम् यत् पुत्रः पितरं सदा अनुवर्तेत, पितुराज्ञाकारी च स्यात्, मातुराज्ञाकारी च स्यात्। भार्या पत्या सह सदा मधुरं व्यवहरेत्। भ्रात्रोः सदा सामंजस्यं भवेत् न परस्परं विद्वेषः तयोस्स्यात्। न च स्वस्रोःपरस्परं वैमनस्यं स्यात्। सर्वे समानव्रतिनो भूत्वा मृदुवाचा च व्यवहरेयुः। यथा देवताः यैर्गुणैः व्यहरन्ति तथैव मनुजैरपि कर्त्तव्यम् येन सर्वेपि देवत्वं प्राप्नुयुः। एतादृशैः वैदिकैरुपदेशैः, औपदिषदीयशिक्षाभिः महद्भिराचरितैः भारतीय पारम्परिकादर्शैः निर्दिष्टे पथि यदा मानवः चलति, चिन्तयति, विचिन्तयति च तदा सः शिक्षया दीक्षया समीक्षया च विभूषितः सन् न केवलमिहैव लोकमपितु अपरलोकमपि आत्मानं विभूषयति, यमैवेष वृणुते तेन च लभ्यो भवति। नान्यः पन्था विद्यतेऽयनाय।

सन्दर्भाः-

1. *ऐतरेयापनिषद् 1.1*
2. *नीतिशतकम्,....*
3. *नीतिशतकम्,....*
4. *सुभाषितरतनभाण्डागारम्*
5. *ईशावास्योपनिषद्, 11*
6. *ऋग्वेदे 10.191*
7. *अथर्ववेदे 12.1.1*
8. *तैत्तिरीयोपनिषद् 1.11*
9. *अथर्ववेदे 12.1.22*

6

रामजी-उपाध्यायस्य सारस्वतयोगदानम्

नौनिहालगौतमः

'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा' इति सूक्तिः संस्कृतविद्यानुरागिभिः उद्घोष्यते। 'संस्कृते एव संस्कृतिः' इति ध्येयवाक्यं यथा उत्तराखण्डसंस्कृताकादम्याः ज्ञापयति यद् भारतीया संस्कृतिः संस्कृते निविष्टाऽस्ति। एवमेव भारतीयसंस्कृतौ संस्कृतमपि व्याप्तमस्ति। केचन महापुरुषाः संस्कृतेः संरक्षणाय कार्यं कुर्वन्ति, केचन च संस्कृतस्य संरक्षणाय संवर्धनाय च। विरला एव तादृशा महापुरुषा ये संस्कृतं संस्कृतिं चापि मिथः उपासते। एतादृशेषु महापुरुषेषु यन्नाम साभिमानं सगौरवं च वक्तुं शक्यते तदस्ति- आचार्यरामजी उपाध्यायः।

प्रथमं तावदाचार्यरामजीउपाध्यायस्य परिचय आचार्य रामजी उपाध्याय' इति नाम्नः प्रत्यक्षरं श्लोकेन दीयते-

आ- आचार्यो रामजी नाम उपाध्यायस्तु वंशतः।
विश्वविद्यालये विद्वानासीत्सागरसंस्थिते।।

चार्- चार्वाकादिनिरासाय श्रुतिमार्गसमाश्रिताः।
संस्कृतिपोषका ग्रन्थाः प्रणीतास्तेन धीमता।।

य- यो ग्राहयति शिष्येभ्य आचारमाचिनोति च।
अर्थान् बुद्धिञ्च तन्नामाचार्यः श्रीरामजी यथा।।

रा- रामवद् व्यवहारः स्याज्जनानां रक्षणं तथा।
गङ्गागीतागवादीनां शिक्षको यदि रामजी।।

म- मलेजी नामके ग्रामे श्रीमहावीरसद्गृहे।
खनेत्रग्रहचन्द्रेति वर्षे जन्माभवच्छुभम्।।

जी- जीवनं तत्तपःपूतमधीतिपूर्णमुत्तमम् ।
बोधाचारप्रचारैस्तु तन्मुनिकल्पतां गतम् ।।

उ- उपन्यासः कवेरस्य गान्धिचिन्तनसंयुतः ।
द्वा सुपर्णेति विख्यातः पुराणरीतिमाश्रितः ।।

पा- पारगो नाट्यशास्त्रस्य रूपकतत्त्वदर्शकः ।
सुविज्ञो नाट्यकारोऽसौ नाट्यैतिह्यविशारदः ।।

ध्या- ध्यायन्ति तं गुरुं नित्यमन्तेवासिपरम्परा ।
भारतीयाश्च विद्वांसः कवयश्चापि भावकाः ।।

य- यशः कायेन जीवेत् सः सिन्धुः सागरिकोद्भवः ।
रञ्जयन्तु जगत्तस्य पावनस्मृतयस्सदा ।।

मनसि, वचसि कर्मणि चैकरूपतां धारयता तपश्चरता आचार्येण जीवनं सफलीकृतम् । सत्याग्रहस्य कश्चन प्रभावः तस्य जीवने आसीत् । सत्यस्य रक्षायै कदाचित् स दुराधर्षोऽपि भवति स्म । अत्र तु अपेक्षितं तस्य सारस्वतं योगदानम् ।

सारस्वतयोगदानम् - उपाध्यायवर्यस्य सारस्वतं योगदानं बहुविधम् । सः बहुभिः उद्यमैः प्रकल्पैः वा सारस्वतयोगदानम् अकार्षीत् । यथा- ग्रन्थरचना, शुभाशंसा-भूमिकादिलेखनम्, व्याख्यानम्, संस्थानां स्थापना, संस्कृतपत्रकारिता, सम्पादनम्, सङ्गोष्ठीनामायोजनम्, नाट्यप्रयोगः, ग्रन्थप्रकाशनं च । अन्यच्च उपमानार्हा अन्तेवासिपरम्परा । अत्रोक्तं तस्य प्रत्येकं कार्यजातम् यज्ञानुष्ठानमिव किमपि वैशिष्ट्यं धरति । इदानीं क्रमेणात्र प्रस्तूयते ।

ग्रन्थरचना- आचार्यरामजीउपाध्यायस्य सारस्वतप्रकल्पेषु ग्रन्थलेखनं किमपि अपूर्वं महत्त्वं धत्ते । तस्य प्रायः सप्ततिः ग्रन्थाः, शताधिकशोधपत्राणि, लेखाश्च प्रकाशिताः सन्ति । उपाध्यायवर्यस्य ग्रन्थानां त्रिविधं वैशिष्ट्यं दर्शनीयमस्ति- भाषागतं विधागतं विषयगतं च ।

भाषागतवैशिष्ट्यम्- आचार्य उपाध्यायः बलियाजनपदे जनिम् अवाप । अतः तत्रत्याम् उपभाषां भोजपुरीं स सम्यक्तया जानाति स्म । पुनः व्यवहारभाषां हिन्दीम्, अध्ययनभाषां संस्कृतभाषां च सम्यग् रूपेण विजानाति स्म । आङ्ग्लशासनसमये उच्चाध्ययनाय आङ्ग्लभाषा प्रचलने आसीत् । अतः इलाहाबादविश्वविद्यालये सः स्वकीयं डी. फिल्. उपाधेः 'संस्कृत एण्ड प्राकृत महाकाव्याज' इति शोधप्रबन्धम्

आङ्ग्लभाषायामेव प्रास्तौत्, कानिचन शोधपत्राणि च आङ्ग्लभाषायाम्। शेषाः ग्रन्थाः शोधपत्राणि च संस्कृते वा हिन्द्यां वा सन्ति। अत्र वैशिष्ट्यमिदं यत् बहुविधभाषाज्ञानद्वारा तेन आचार्येण सरस्वतीसपर्या एव विहिता। उपाध्यायवर्येण ग्रन्थरचनामाध्यमेन यत् सारस्वतम् अनुष्ठानं सम्पादितम् तस्य रचनाप्रकाराः - मौलिककाव्यकृतयः, इतिहासग्रन्थाः, शास्त्रीयग्रन्थाः, सम्पादितग्रन्थाः, पाठ्यग्रन्थाश्चेत्यादयः। ग्रन्थानां विषयवस्तु क्षेत्रं वा वर्तते- प्रेरकचरितानि, भारतीया संस्कृतिः, नाट्यं, नाट्यशास्त्रं, प्राचीनसाहित्यम्, आधुनिकसाहित्यं, गान्धिदर्शनं, धर्मशास्त्रं चेत्यादि।

मौलिककाव्यकृतय :- कवेः रामजी-उपाध्यायस्य मौलिककाव्यकृतयः द्वयोः विधयोः स्तः- नाट्यं तथा गद्यकाव्यम् (उपन्यासः)। नाट्यग्रन्थेषु उपाध्यायवर्यस्य संस्कृते सप्त रूपकाणि, रामकथाश्रितानि सीताभ्युदयम्, कैकेयीविजयम्, शम्बूकाभिषेकम् च, महाभारतकथाधारितम् एकलव्यविजयम्, बुद्धकथावलम्बिते अशोकविजयम्, नन्दगौतमीयम् च, भारतरत्नस्य 'महामना' इतिलब्धविरुदस्य चारुचरितज्ञापकं मदनमोहनमालवीय-कीर्तिमञ्जरीनाटकम् च, हिन्द्यामपि विश्वविजय, पूर्वपथनाटकं च स्तः। कस्यापि कवेः शास्त्रज्ञानस्य प्रभावः तस्य कृतिषु भवति एव। आचार्यरामजी- उपाध्यायस्य नाट्यविषयकसिद्धान्तानां प्रभावः कविरामजी उपाध्यायस्य नाट्यकृतिषु दृश्यते। यदि तस्य नाट्यशास्त्रीय-ग्रन्थ-वर्णितसिद्धान्त-दृष्ट्या तस्यैव रूपकाणां परिशीलनं क्रियते तर्हि प्रयोगपक्षे सिद्धान्तपक्षस्य प्रबलप्रभावः इति ज्ञातुं शक्यते। रूपकेषु विष्कम्भकप्रवेशकयोः समुचितविन्यासः वर्तते, ऊह्यवस्तुनः चूलिकाऽङ्कावतारयोश्च अभावः। वीररसोऽङ्गित्वेन स्वीकृतः। रूपकेषु नाट्यनिर्देशास्तु प्राचुर्येण विन्यस्ताः, ते च आचार्योपाध्यायस्य नाट्यशास्त्रविदग्धतां प्रतिष्ठापयन्ति। एतेषु रूपकेषु कविना उपाध्यायवर्येण परम्पराप्राप्ततथ्यानां चरितानां च युगानुकूलं तार्किकं व्याख्यानं प्रस्तुतम्। शम्बूकाभिषेकस्य भूमिकायां तेन स्वयं लिखितम्-'फिर भी उसमें (मर्यादापुरुषोत्तम श्रीरामचन्द्र जी की चारु चरितावली) में यदि कुछ धब्बे भूलचूक से आ गये हैं तो सनाम होने के कारण वे मेरे लिए भी असह्य हैं। उन्हें धो डालना है।'[1]

उपाध्यायवर्यस्य रूपकाणां प्रमुखम् उद्देश्यं भारतीयजनमानसे उदात्तभावभरणम् अस्ति। तत्कृते सांस्कृतिकतत्त्वानि रूपकेषु पदे पदे निविष्टानि।

कैकेयीविजयस्य भूमिकायां स लिखति- 'मेरी रचना का प्रमुख उद्देश्य है पाठक या प्रेक्षक को भारत की सांस्कृतिक-धारा-में अवगाहन कराना'।[2] उपाध्यायवर्यस्य रूपकेषु लोकहितं सर्वोच्चस्थाने प्रतिष्ठितम् अस्ति। किमधिकं सीताभ्युदयस्यानुशीलनेन ज्ञायते यत् लोकहितसाधने एव चारित्रिकोत्कर्षस्य तपसश्च साफल्यं भवति। नाट्यसिद्धान्तपालने दत्तचित्तस्य, कथावस्तुनः उदात्तीकरणाय बद्धपरिकरस्य, सांस्कृतिक-तत्त्व-निरूपणैकलक्ष्यस्य, गद्यलेखकस्य उपाध्यायवर्यस्य रूपकाणि न तथा आनन्दोल्लासितान् करोति सहृदयान् प्रेक्षकान् यथा भासकालिदासभवभूतिकृतानि नाट्यचारुत्वोपेतानि रूपकाणि। उपाध्यायवर्यस्य रूपकेषु प्रबन्धवक्रता समुल्लसति।

गद्यकाव्ये कवेः उपाध्यायवर्यस्य संस्कृते सत्यहरिश्चन्द्रोदयम्, द्वा सुपर्णा च उपन्यासौ स्तः। तस्य द्वा सुपर्णेति उपन्यासः महतीं ख्यातिम् अवाप। तदाधारेणैव उपाध्यायवर्यः कुशलगद्यकाररूपेण संस्कृतजगति प्रतिष्ठापितोऽभवत्। द्वा सुपर्णेति नाम वैदिकमन्त्रमनुसरति। कथा च अस्य उपन्यासस्य श्रीकृष्णसुदाम्नोः प्रसिद्धं चरितमवलम्ब्य वर्तते। कविरामजीउपाध्यायस्य कृतिषु विशिष्टैका प्रवृत्तिरस्ति पौराणिकपात्राणां चरितानां च युगानुकूलप्रस्तुतिकरणस्य। यथा- अस्मिन् ग्रन्थे 'कृष्ण एव भारतस्य भाग्यविधाता'[3] इत्यत्र राष्ट्रगानस्य 'जन गण मन अधिनायक जय हे! भारत भाग्य विधाता।' इत्यस्य संयोजनं दृश्यते। सुदामा यौतुकप्रथायाः विरोधं करोति तथा विवाहसमये केवलं सवत्सां गां स्वीकरोति।[4]

सुदाम्नः आश्रमे चतुर्वर्णानां छात्राणां प्रवेशः भवति स्म अन्यच्च निःशुल्कं शिक्षायाः व्यवस्था आसीत्।[5]

सुदाम्नः पत्नी कौमुदी ग्रामाभ्युदयं कर्तुम् इयेष। तस्याः प्रयासैः तत्र उन्नतिः जाता।[6] कौमुद्याः प्रयासैः तत्रत्येषु जनेषु स्वावलम्बनभावना समुद्भूता। तद्यथा-

'कौमुद्या आदर्शं स्वीकृत्य सर्वा ग्रामवधूट्यः 'स्वकीयैः सूत्रैर्निष्पन्नं वस्त्रं धारयामः' इति कृतसन्धाः स्वयं नवीनं चक्रं चालयित्वा (हिन्द्यां चरखा चलाकर) नित्यं सूक्ष्मतरं सूत्रं निर्ममुः। ईदृशैः सूक्ष्मसूत्रैर्निष्पन्नं वस्त्रं सर्वेषां मनो जग्राह। अचिरादेव नागरिकशिल्पकाराणां वस्त्राणि तत्रत्यजनैः परित्यक्तानि'[7] कौमुद्या कृतं ग्रामाभ्युदयं पतिः सुदामा सगौरवं वर्णयति। कृष्णः सम्पूर्णभारते कौमुद्या

सञ्चालितानां योजनानां सञ्चालनं कर्तुं कामयते तत्कृते च सः रुक्मिणीं सहायिकामिच्छति।[8]

प्राचीनग्रन्थेभ्यः प्रसङ्गानुकूलानि उद्धरणानि गृहीतानि।

उपन्यासेऽस्मिन् सामाजिकी क्रान्तिः विशेषतः महात्मगान्धिनः, सामाजिकरूढीनां पाखण्डानां च विरोधः, नवाचारश्च कश्चन दृश्यते। सम्प्रति प्रचलितस्य स्त्रीविमर्शस्यापि कापि मनोहारिणी छविः विद्यते। यथा- 'भारतीय-ग्रामाणामभ्युत्थाने नारीणां प्रथमं स्थानं विद्यते इति कौमुद्याः कार्यजातैः स्पष्टम्।'[9] अतः उपन्यासलक्षणसङ्गतिः ग्रन्थेऽस्मिन् भवति। यथोक्तम् अभिराजयशोभूषणे उपन्यासलक्षणनिरूपणप्रसङ्गे-

'क्वचित् सामाजिकी क्रान्तिः सर्वोदयसमर्थिनी।
रूढिपाखण्डविध्वंसो नवाचारः क्वचित् पुनः।।

इदं सविशेषम् अवधेयं यत् तत्र अभिराजयशोभूषणकारेण उपन्यासस्य उदाहरणे अस्य नाम उदाहृतम्। यथा रामजीउपाध्यायप्रणीतः द्वा सुपर्णा इति।'[10]

आचार्यराधावल्लभत्रिपाठिनः 'संस्कृत साहित्य का समग्र इतिहास' इत्यस्य आधुनिककालसञ्ज्ञके चतुर्थखण्डे (पृ.1928) द्वा सुपर्णा उपन्यासः उल्लिखितः। साहित्यिकं वैशिष्ट्यमस्य उपन्यासस्य विद्वद्भिः बहुशः वर्णितम्। द्वा सुपर्णेति उपन्यासे अङ्गीरसः वीररसः, वृत्तिश्च सात्वती। गद्यमत्र वृत्तगन्धि। क्वचित् अनायासेनायातोऽनुप्रासालङ्कारः। उपाध्यायस्य कृतिषु शब्दसौष्ठवं किमपि अपूर्वं महत्त्वं धत्ते।

संस्कृतिपरकग्रन्था :- आचार्यरामजी-उपाध्यायमहाभागेन महताऽध्यवसायेन एते ग्रन्थाः रचिताः। एतेषु ग्रन्थेषु संस्कृतभाषायां भारतस्य सांस्कृतिकनिधिः, भारतीयसंस्कृतिसौरभम्, विश्वमानवसंस्कृतिः, महाभारतीयसंस्कृतिकोशः, हिन्द्यां प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका (डी.लिट्. शोधप्रबन्धः), भारतीय संस्कृति का उत्थान, भारत की संस्कृति साधना च सन्ति।

इतिहासग्रन्थाः- आचार्यरामजी उपाध्यायः संस्कृतसाहित्येतिहासपरकग्रन्थान् रचितवान्। ते सन्ति- संस्कृते मध्यकालिकः संस्कृतनाटकालोकः, विंशशताब्दिकं संस्कृतनाटकम्, आधुनिकसंस्कृतसाहित्यानुशीलनम्, हिन्द्यां संस्कृत साहित्य का आलोचनात्मक इतिहास, आधुनिक संस्कृतनाटक, संस्कृत के महाकवि और काव्य।

शास्त्रीयग्रन्थाः- आचार्यरामजी उपाध्यायः बहुविधशास्त्रज्ञः आसीत्। तेन नाट्यशास्त्रमवलम्ब्य शास्त्रीयग्रन्थाः रचिताः। ते च ग्रन्थाः महान्तः उपकारिणः नाट्यतत्त्वजिज्ञासूनां कृते। शास्त्रीयग्रन्थाः नाट्यशास्त्रीयानुसन्धानम्, नाट्यशास्त्रीयप्रयोगविज्ञानम्, दशरूपकतत्त्वदर्शनम्, नाट्यशास्त्रीय- पारिभाषिक-शब्दानुक्रमणिका च संस्कृते एव सन्ति।

सम्पादितग्रन्थाः- उपाध्यायवर्येण सम्पादिताः ग्रन्थाः भासनाट्यग्रन्थावलिः, मनुस्मृतिनवनीतम्, संस्कृतसूक्तिरत्नाकरः, धम्मपद, संस्कृतमहाकाव्यादर्शः च सन्ति।

पाठ्यग्रन्थाः- विद्यार्थिनां पाठ्यक्रमे सौकर्याय आचार्येण केचन ग्रन्थाः रचिताः यथा- संस्कृते संस्कृतनिबन्धावलिः, सामान्यसंस्कृतव्याकरणम्, संस्कृतनिबन्धकलिका च। अन्ये ग्रन्थाः अपि केचन सन्ति यथा- संस्कृते महाकविः कालिदासः, आङ्ग्लभाषायां संस्कृत एण्ड प्राकृत महाकाव्याज (डी.फिल्. शोधप्रबन्धः) च।

उपाध्यायवर्यः स्वलेखनकार्याय बहुशः प्रशंसितः। पद्मभूषणविभूषितः आचार्यबलदेव उपाध्यायः आचार्यरूपेण कविरूपेण च आचार्यरामजी उपाध्याय वर्यस्य लेखनसाफल्यं प्रशंसन् अलेखीत्- 'धन्योऽयं लेखको यस्य भावयित्री कारयित्री चेति उभयविधा प्रतिभा आनन्दोल्लसितान् विधत्ते साहित्यमर्मज्ञान्।'[11]

शुभाशंसा-भूमिकादिलेखनम्- संस्कृतपरिषदः अध्यक्षरूपेण ततः प्रकाशितेषु ग्रन्थेषु उपाध्यायवर्यस्य काचित् शुभाशंसा वा भूमिका वा भवति स्म। यथा वनमालाभवालकरवर्यायाः पार्वतीपरमेश्वरीयमिति सङ्गीतिकायाः प्रवेशिका, तस्या एव रामवनगमनमितिसङ्गीतिकायाः आमुखं च। तत्रापि तस्य अध्ययनगभीरता, लेखनपटुत्वं, महती सूक्ष्मेक्षिका चेत्यादयः द्रष्टव्याः सन्ति।

व्याख्यानम्- आचार्यरामजीउपाध्यायस्य व्याख्यानानि अखिले भारते भवन्ति स्म। द्वा सुपर्णेति उपन्यासस्य भूमिकायां तेन लिखितम्- 'उज्जयिन्यां सप्तदशाधिक-द्विसहस्रतमे (2017) विक्रमसंवत्सरे मध्यप्रदेशीय संस्कृत सम्मेलनस्यावसरेऽध्यक्षपदेन पण्डितानां समक्षं कांश्चिदार्षादर्शान् प्रतिष्ठापयितुकामोऽहं तत्रत्य महात्मनां चरितानि अनुसंहितवान्।[12]

कविराधावल्लभेन स्वकीयाद्यकृतिप्रेमपीयूषनाटकसमर्पणपद्ये सः 'सुवाग्मी' इति वन्दितः, यथा-

'तस्मै कृतिमिमां रम्यां श्रीरामाय सुवाग्मिने।
उपाध्यायाय गुरवे शिष्यभावात् समर्पये।।'[13]

अतः परम् आचार्यरामजीउपाध्यायेन अन्यैः उद्यमैः यत् सारस्वतयोगदानं कृतं तत्प्रस्तूयते।

संस्थासंस्थापना- सारस्वतोपक्रमाणां सञ्चालनस्य सौकर्याय आचार्येण काश्चन संस्थाः स्थापिताः। सागरिकापत्रिकायाः प्रकाशनाय सागरिकासमितिः, संस्कृतग्रन्थानां प्रकाशनाय संस्कृतपरिषद्, गान्धिदर्शनप्रसाराय गान्धिपरिषद् सागरनगरे। संस्कृतभाषा-भारतीयविद्याप्रसाराय लक्ष्मणसंस्कृतविद्यालयः ढानायां, संस्कृत-संस्कृति-साहित्यप्रकाशनाय भारतीयसंस्कृतिसंस्थानं वाराणस्याम् च। संस्कृतविद्यायाः प्रसाराय स प्राणपणेन संलग्नोऽभूत्। कदाचित् स स्वशिष्यं रामलखनपाण्डेयम् अब्रवीत् यत् 'उपाध्यायस्यात्मा तत्र विद्यालये प्रतिवसतीति'।[14]

संस्कृतपत्रकारिता- उपाध्यायवर्येण द्वाषष्ट्यधिक-नवशताधिकैकसहस्रतमे (1962) क्रैष्टाब्दे संस्कृतवाङ्मयनिहितज्ञानप्रसाराय सागरिकापत्रिकायाः प्रकाशनम् आरब्धम्। अनेन संस्कृतपत्रकारितायाः क्षेत्रे किमपि नवीनं सोपानं निर्मितम्। सेयं सागरिका इदानीमपि प्रचलति। तस्याः नैके विशेषाङ्काः प्रकाशिताः, रामजीउपाध्यायविशेषांकोऽपि।

सम्पादनम्- सागरिकापत्रिकायाः नैकेषां ग्रन्थानां च सम्पादनम् आचार्येण कृतम्। सागरिकायाः प्रत्येकम् अङ्के तस्य निवेदनं वा सम्पादकीयं वा लेखो वा प्रकाशितो भवति स्म।

सङ्गोष्ठीनामायोजनम्- आधुनिकसंस्कृतसाहित्यमवलम्ब्य प्रथमा सङ्गोष्ठी सागरविश्वविद्यालयस्य संस्कृतविभागे विभागाध्यक्षेण आचार्यरामजीउपाध्यायवर्येण आयोजिता पञ्चषष्ट्यधिक-नवशताधिक-एकसहस्रतमस्य (1965) क्रैष्टाब्दस्य मई-मासे। अतः आधुनिकसाहित्यस्य उन्नयने उपाध्यायवर्यस्य महदिदं योगदानम्।

नाट्यप्रयोगः- उपाध्यायवर्यस्य आध्यक्ष्ये संस्कृतविभागे नाट्यप्रयोगस्य परम्परा प्रचलिता। विगतशताब्द्याः सप्तमे दशके उज्जयिन्यां कालिदाससमारोहे विभागद्वारा कृताः नाट्यप्रस्तुतयः प्रशंसिताः पुरस्कृताश्च। विदुष्याः वनमालाभवालकरवर्यायाः सङ्गीतिकाः बहुशः मञ्चे प्रस्तुताः, लोकानन्दाय जाताः।[15]

ग्रन्थप्रकाशनम्- उपाध्यायवर्येण सागरसंस्थितसंस्कृतपरिषद्द्वारा स्वकीयाः

बहवश्चान्येषामपि संस्कृतग्रन्थाः प्रकाशिताः। सेवानिवृत्तेरनन्तरं स सर्वविद्याया राजधान्यां काश्यां वसतिमकरोत्। तत्र संस्कृत-संस्कृति-साहित्यप्रकाशनाय भारतीयसंस्कृतिसंस्थानं तेन स्थापितम्, बहवो ग्रन्थाः सागरिकायाः केचन अङ्काश्च ततः प्रकाशमायाताः।

अन्तेवासिपरम्परा- न कश्चित् शिष्यविहीनो गुरुः भवितुम् अर्हति। सच्छिष्याय विद्याप्रदानेन विद्यायाः संरक्षणं भवति ततो गुरुः निश्चिन्तो भवति। आचार्य-उपाध्यायस्य संस्कृतपरायणानां योग्यशिष्याणां परम्परा तस्य सारस्वतम् अवदानमेव प्रकटीकरोति। सुदीर्घा तस्य अन्तेवासिपरम्परा। तस्य निर्देशने एकोनचत्वारिंशत् (39) जनाः पीएच.डी. इति उपाधिं अलभन्त। तेषु प्रमुखाः सम्मान्याः हरीन्द्रभूषणजैनः, हीरालालशुक्लः, इन्दरमोहनसिंहः, कुसुमभूरिया महोदया, राधावल्लभत्रिपाठी, रामगोपालमिश्रश्चेत्यादयः। मनोरमा सक्सैना महोदया तस्य निर्देशने डीलिट्. उपाधिं प्राप्नोत्। अन्यच्च उदारचरितस्य उपाध्यायवर्यस्य 'अयं निजः परो वेति गणना नासीत्'। बहूनाम् अन्येषामपि मार्गदर्शनम् आचार्येण कृतम्- यथोक्तं तत्कृतज्ञेन आचार्यरहसबिहारिद्विवेदिना-

'शोधेऽथ शोधपत्रे च लेखने प्रेरको मम।
उपाध्यायमहाभागो मदीयो मार्गदर्शकः।।'[16]

एवं प्रकारेण उपाध्यायवर्यः बहुभिः प्रकल्पैः महत्त्वपूर्णं सारस्वतयोगदानम् अकार्षीत्। प्रकाशनसाधनानामभावेऽपि नैकेषां ग्रन्थानां पत्रिकाणां च प्रकाशनम् आचार्येण कृतम्। पौराणिकपात्राणां कथानां च दुर्व्याख्याः तेन अपाकृताः, युगानुकूला तार्किकी व्याख्या कृता। तस्य सर्वेषां ग्रन्थानाम् अनुशीलनेन भारतीयसांस्कृतिकगौरवस्य काऽपि अपूर्वा छटा उद्भासते। अन्यच्च लोकहितभावना मुख्यत्वेन राजते। भावयित्री कारयित्री चेति उभयविधप्रतिभा सम्पन्नस्य शास्त्रज्ञ-कवि-रामजीउपाध्यायवर्यस्य प्रवृत्तिः संरक्षणे, संवर्द्धने, संस्कारे, सौष्ठवे, सुधारणे चासीत् इति वाङ्मयानुशीलनेन ज्ञायते। स्वकीयेन वैदुष्येण राष्ट्रस्तरे ख्यातिं गतेन आचार्येण अखिलभारतीयप्राच्यविद्यासम्मेलनादिषु आध्यक्ष्यादिदायित्त्वम् निर्व्यूढम्। विभिन्नसमितिषु तेन संस्कृतस्य पक्षो रक्षितः। सारस्वतसपर्यायाः प्रतिफलरूपेण प्राप्तेषु सम्मानेषु राष्ट्रपतिसम्मानः, काशीहिन्दूविश्वविद्यालयतः डी.लिट्. उपाधिः, विश्वभारतीसम्मानश्च प्रमुखाः।

तस्य कृतिषु बहूनि शोधकार्याणि कृतानि, क्रियन्ते च। एतादृशः संस्कृत संस्कृति सेवापरायणः मनीषी आचार्यः रामजी उपाध्यायः एकादशाधिकद्विसहस्रतमे (2011) क्रैष्टाब्दे दिवम् प्रयातः। इति दिक्।।

सन्दर्भाः-

1. *शम्बूकाभिषेकस्य भूमिकायाम्*
2. *कैकेयीविजयस्य भूमिकायाम्*
3. *द्वा सुपर्णा, पृ. 15*
4. *तदेव, पृ. 29*
5. *तदेव, पृ. 46*
6. *तदेव, पृ. 46,47*
7. *तदेव, पृ. 52*
8. *तदेव, पृ. 66*
9. *तदेव, समाप्तिपृष्ठे*
10. *अभिराजयशोभूषण, पृ. 233, 235*
11. *सागरिका 26/4, पृ.115*
12. *द्वा सुपर्णा भूमिकायाम्*
13. *प्रेमपीयूषनाटकसमर्पणपद्यम्*
14. *सागरिका 42/1, पृ.59*
15. *पार्वतीपरमेश्वरीयस्य प्रवेशिकायाम्*
16. *सागरिका 42/1, पृ.12*

7

''हिमाचलप्रदेशे संस्कृत-संरक्षणदिशि शासकानां प्रशासकानाञ्च योगदानम्''

दिनेशशर्माभारद्वाजः

देवभूमिः हि हिमाचलम्। देवा निवसन्त्यत्र इति जनविश्वासः। अयं प्रदेशः भारतीयसंस्कृतसाहित्यस्य उद्गमस्थानं अतिप्राचीनकालादेव संस्कृत-संस्कृति समाराधने संरक्षणे च अग्रणी भूतम्। साक्षात्कृतधर्माण ऋषयः हिमालयस्य उपत्यकासु तपः आचरितवन्तः। एवं गौरवमयी खल्वस्य प्रदेशस्य संस्कृतपरम्परा। सम्प्रति देवभूमौ देवभाषासंस्कृतस्य या सुस्थितिः वर्तते सा शासकानां प्रशासकानां संस्कृताचार्याणाञ्च महद्योगदानस्य प्रतिफलम्। 'संस्कृतिः संस्कृताश्रिताः' इति संकल्पं मनसि निधाय एते संस्कृतानुरागिणः संस्कृतरक्षणे तत्परा भूत्वा स्वीयं योगदानं दत्तवन्तः। प्राचीने हिमाचले संस्कृतस्य प्रचलनमासीत्। मुगल-शासनकाले ब्रिटिशपराधीने (मैकालेशिक्षापद्धतिप्रचलनेन) भारतवर्षे संस्कृताध्ययनं शिथिलं संजातम्। मुगलकाले धर्मविध्वंसकानां अत्यंतं मार्मिकं दृश्यं प्रस्तुतं अम्बिकादत्तव्यासेन।[1] हिमाचलप्रदेशः तदानीं भिन्न-2 लघुराज्येषु राज्ञाम् शासनाधीनआसीत्। शासकाः संस्कृतोत्थानाय भूरिशः प्रयतितवन्तः। राज्ञाम् राजवंशावली संस्कृतभाषायां समुपलभ्यते। एतासु प्रमुखास्सन्ति- चम्बावंशावली, त्रिगर्तवंशावली, जुब्बलराजवंशावली च। हिमाचलसंस्कृतसाहित्यस्य मूलस्रोतभूतां अनुष्टुपछंदसि विरचितानां एतासां वंशावलीनां कर्तृभिः अवश्यमेव राजाश्रयं लब्धमिति प्रतीयते।[2] हिमाचलप्रदेशे राज्ञाम् शासनकालेऽपि विदेशादागतैः आक्रान्तैः प्रशासने प्रविश्य शनैः-शनैः संस्कृतभाषा प्रशासनादबहिर्निष्कासिता। अत्रत्याः राजानः तस्मिन् काले संस्कृतं प्रोत्साहितवन्तः यदा प्रशासनिककार्येषु उर्दू-

आंग्लभाषयोः प्रभावः उत्तरोतरमधिकमभवत्। राजानः संस्कृते पत्रव्यवहारं कुर्वन्ति स्म। अनन्तरं नृपवर्गाः संस्कृतानभिज्ञाः जाताः, परिणामतः संस्कृतभाषा उपेक्षिताभवत्, तथापि संस्कृतानुरागिणः केचन नृपाः राजपण्डित- राजवैद्य-राजज्योतिर्विद्भिश्च माध्यमेन संस्कृतं प्रोत्साहितवन्तः। प्रदेशस्य नैकराज्ञाम् राजप्रासादेषु संस्कृतस्य समृद्धाः पुस्तकालया अप्यासन्। स्वतंत्रतायाः पश्चात् ये नष्टप्रायाः संजाताः।[3]

शासकानां योगदानम्

स्वातंत्र्यात्पूर्वं धर्म-संस्कृतिसंरक्षकाः संस्कृतस्य परमोपासकाः अभवन्। नैके शासकाः गुरुकुलशिक्षापद्धतिरक्षणे, पञ्चाङ्गनिर्माणे, संस्कृतपत्रकारिता-विकासे संस्कृतपाठशालादीनां समुद्धाराय संस्कृतस्य अभ्युदयाय च प्रभूतं साहाय्यं कृतवन्तः। एतेषां आश्रयमवाप्य दैवज्ञाः, पण्डिताश्च संस्कृत-संस्कृतेः प्रचारः प्रसारश्च विहितवन्तः। तादृशेषु शासकेषु मुख्याः आसन्-बघाटनरेशः, सुकेतनरेशः, जुब्बलनरेशः, बुशहरनरेशादयः। संस्कृतरक्षणे एतेषां योगदानमधस्तात् प्रस्तूयते विविच्यते च-

1. बघाटनरेशः

हिमाचले राजभिः संस्कृतशिक्षणव्यवस्था संचाल्य प्रदेशे संस्कृतस्य समुत्थानाय महीयान् प्रयासः विहितः। कैश्चन राजभिस्तदानीं संस्कृतस्य सम्वर्धनाय स्वराजधानीषु संस्कृतविद्यालया अपि स्थापिताः। बघाटनेरशसंचालितः सोलनस्थः तारिणीसंस्कृतविद्यालयः अस्य प्रमाणम्। अस्य महाविद्यालयस्य स्थापना बघाटनरेश दुर्गासिंहेन अप्रैलमासस्य 13 दिनांके 1929 तमे वर्षे कृता। बघाटनृपस्य श्रीदुर्गासिंहस्य आश्रयं समवाप्य पण्डितवर्यः मथुरानाथप्रसाददीक्षितेन स्वकृतिभिः संस्कृतसाहित्यस्य संवर्धनं कृतम्। पण्डितहरदेवशर्मात्रिवेदी पण्डितमुकुन्दवल्लभश्च अस्याश्रये ज्योतिश्शास्त्रस्य संरक्षणे महनीयम् कार्यम् कृतवन्तौ। विश्वविख्यातमार्तण्डपञ्चाङ्गस्य प्रकाशनेऽस्य पूर्ण-सहयोगः श्रीमता मुकुन्दवल्लभाचार्येण स्वतंत्रताप्राप्तिकालं यावल्लब्धम्। श्रीहरदेवशर्मात्रिवेदीमहोदयं सोलननगरे भूमिं प्रदाय तत्रैव निवासं कारितवान्। एतेन विश्वविजयपञ्चाङ्गस्य सञ्चालने आजीवनं प्रभूतं योगदानं दत्तम्। अस्य राज-शासनकाले कर्मकाण्डस्यापि भूयान् पल्लवनं प्रचारश्च संजातः । संस्कृतपत्रकारिताया कृतेपि अपेक्षितं साहाय्यं

प्रदत्तवान्। दिव्यज्योतिपत्रिकायाः आजीवनं संरक्षकत्वं स्वीकृतम्। राजा दुर्गासिंहः, बघाटनरेशः, राजा श्रीवशिष्ठचन्द्रः, ललित कोटीनरेशः, राजा श्रीदिग्विजयचन्द्रः, जुब्बलनरेशादयो राजानो दिव्यज्योतिपत्रिकायाः आजीवनं संरक्षकाः आसन्। एतादृशैः कार्यैः संस्कृतानुरागिणा महीपेनानेन देवभाषोत्थानाय महती सेवा कृता।

2. त्रिगर्तशासकाः

त्रिगर्तक्षेत्रे राज्ञामाश्रये संस्कृताध्यापनाय संस्कृतविद्यालया संचालिता भवन्ति स्म परं प्रश्रयाभावात् क्रमशः ते समाप्ताः।[4] राज्याश्रये विद्वान्सः स्वगृहे एव संस्कृताध्यापनं कारयन्ति स्म संसारचन्दराज्ञः शासनकालः (1775-1823) काँगड़ाकलमस्य स्वर्णिमः युगः कथ्यते। अस्य शासनकाले कविवरस्य जयदेवस्य संस्कृतप्रेमकाव्यम् गीत-गोविन्दः, भागवतपुराणम्, नलदमयन्ती इत्यादिषु रसिकप्रियां कविप्रियां चित्रेषु चित्रितम्। एतदतिरिक्तं राज्ञा सह श्रीकृष्णस्य श्रृँगारिकचित्राणि, रामायणम्, महाभारतम्, भागवतपुराणम्, चण्डी-उपाख्यान (दुर्गापाठस्य), देवीमाहात्म्ये पौराणिककथासु च चित्रकलाया अंकनं जातम्। इत्थं चित्रकलाव्याजेन अनेन राज्ञा संस्कृतं सम्वर्धितम्।

3. बुशहर शासकाः

बुशहररियासतेपि प्राचीनकालादेव संस्कृतस्य सम्वर्धनमभूत। विदुषामागमनमत्र भवति स्म। स्वतंत्रताया अनन्तरं राजभिः संचालिताः अधिकांशाः संस्कृतविद्यालयाः समाप्ताः, यतोहि शासकैः स्वराज्यानि परहस्तायितानि।[5] राजा वीरभद्रसिंहः हिमाचलस्य संस्कृतानुरागीराजसु श्रेष्ठतमं व्यक्तित्वमासीत् दिव्यज्योतिपत्रिकायाः प्रधान सम्पादकेन आचार्यकेशववर्येणापि अस्य संस्कृतानुरागित्वं अनेकत्र प्रकटितम्। श्रीवीरभद्रसिंहेन आचार्य श्रीदिवाकरमहोदयस्य सान्निध्यं लब्धम्। संस्कृतसाहित्यसम्मेलनस्य अध्यक्षता कृता तथा प्रदेशे संस्कृतविकासाय भूयान् यत्नः विहितः। श्री वीरभद्रसिंहस्य मातुः शान्तिदेवीमहोदया अत्यन्तं धार्मिकप्रवृत्तेः स्त्री आसीत्। श्रीवीरभद्रसिंहस्य प्रेरणया संस्कृतविद्यालयस्य कृते ग्रीष्मकालीनराजधान्यां सराहने एकं भवनं शान्तिदेवीसंस्कृतविद्यालयनाम्ना समर्पितम्। विद्यालयस्य अध्यापकानां वेतनादिस्य व्ययभारोपि निर्वोढम्, नैकवर्षपर्यंतमस्य संचालनञ्चाकरोत्। दिव्यज्योतिपत्रिकाया आजीवनं संरक्षकत्वं स्वीकृतम्। दिव्यज्योतिपत्रिकायाः कृते संस्कृतस्य सर्वोत्कृष्टरचनार्थं ''पद्मपुरस्कारः'' नाम्ना एका पुरस्कारयोजना अपि प्रारब्धा।

4. सुकेतशासकाः

मण्डी(सुकेत) राजप्रचालितः सुन्दरनगरस्थः संस्कृतमहाविद्यालयः संस्कृतस्य क्षेत्रे महत्वपूर्णस्थानमवधत्ते। सुंदरनगरस्थः राजकीयसंस्कृत महाविद्यालयः सुकेतस्य राजभिश्च संचालितः। 1923 तमे वर्षे गुरुकुलोयं राजकीयसंस्कृतमहाविद्यालयसुन्दरनगरे परिवर्तितः। राज्ञः ललितसेनस्महोदयानामत्र विशिष्टम् योगदानम्। दिव्यज्योतिपत्रिकाया सुप्रतिष्ठितः सम्पादकः आचार्यकेशवशर्मानुसारं यदा प्रधानमंत्रीकार्यालये यदा ते शास्त्रीवर्याणां निजीसचिवाः आसन् तदा संस्कृतस्य विशेषोन्नतयै तैराश्वासनमपि दत्तम्, किन्तु दैवदुर्योगेन दिवंगते कार्यमेतत् पूर्णम् नाभवत्। सुकेतराज्याश्रिता पण्डितवर्यः हरिकृष्णदयालुमहोदयः प्रदेशस्य ज्योतिषमर्मज्ञः प्रतिष्ठितः विद्वान् येन पञ्चाङ्गनिर्माय संस्कृतसेवा विहिता। जंगमबागनाम्नि स्थले प्राचीने काले गुरुकुलपद्धत्यनुरूपं वेदाध्यापनं भवति स्म। सुकेतराज्यस्य राज्ञः लक्ष्मणसेनस्य कार्यकाले विदुषां प्रयासेन सहयोगेन संस्कृतस्य वेद-पुराण-गीता-कर्मकांडाद्यध्ययनार्थं करतारपुरनामकस्थलस्य चयनं जातम्। सम्प्रति अस्य नाम 'पुरानाबाजार' इत्यस्ति।

जुब्बलशासकाः

जुब्बलशासकाः संस्कृतोत्थानाय महद्योगदानं अकार्षुः। जुब्बलराजाश्रये श्रीमान् तारादत्ताभिधो दैवज्ञः सूत्रग्रंथम् विनिर्मितवान्। संस्कृतानुरागी पद्मचन्दोपि धार्मिकमनोवृत्तेः शासक आसीत्। सः सदैव संस्कृतविदुषां सताञ्च सेवायां संलग्नो भवति स्म। तेन स्वक्षेत्रे दूरदेशादपि बहवः संस्कृतविद्वान्सः आहूताः। एतेषु पण्डितसन्तरामाभिधो कश्चन् विद्वान् संस्कृतभाषायां जुब्बलवंशावली धार्मिकग्रंथाश्च लिखितवान्। राणापद्मचन्दः काशीतः अस्य प्रकाशनमकरोत्।[6] ललितकाव्यस्य रचयितुः पंडितकन्हैयालालशर्मणः काव्यस्य संस्कृत-हिंदीव्याख्या विदुषा पंडितसंतरामशर्मणा कृता। काव्यभूमिकया संपूर्णरचनाविश्लेषणेन चेदम् स्पष्टम् लक्ष्यते यदयं तत्कालीनजुब्बलरियासतस्य राज्ञः राजपुरोहितः आसीत्। काव्यमिदम् वाराणसीतः 1895 तमे वर्षे प्रकाशितम्। काव्यस्य कथानकम् जुब्बलरियासतस्य राज्ञामुपरि आश्रितः। अनेन ज्ञातं भवति यत् स्वातंत्रतयात्पूर्वम् शिमलाजिलायां रियासतीकालेपि संस्कृतसाहित्यं रचितमासीत्। जुब्बलनरेशस्य

राजवंशावली अस्य प्रमाणम्। जुब्बलनरेशः राणापद्मचन्द्रः ''पद्म कोशाभिधो आधुनिकविद्याया आधारेण एकः कोशः विनिर्मितवान्। तत्कालीनः राजा श्रीदिग्विजयचन्द्रोपि पुनः प्रकाशनस्य विचारः कृतवान् किन्तु असमये दिवङ्गते सति कार्यमेतत् अपूर्णमेव। कोटीरियासतस्यपूर्वराज्ञा श्रीवशिष्ठचन्द्रललितेन श्रीदुर्गासप्तशत्याः विशिष्टतांत्रिकविधिविधानसहितं मुद्रणम् कारितम्। परन्तु एतदपि अप्राप्यमेव। भज्जीराज्यस्य राजान ''अभिधानचिन्तामणि'' नामकं संस्कृतकोशस्य निर्माणं विनिर्मितवान्। सम्प्रति अप्राप्यमिदम्। रत्नकुमारीशोधसंस्थानेस्य एका प्रति विद्यमानास्ति। 'जुनगा' इति क्षेत्रेपि क्योंथलराज्ञा संचालितैका संस्कृतपाठशाला स्वतंत्रताप्राप्त्यन्तरं निरुद्धा जाता। एतदतिरिच्य पपरोलास्थः संस्कृतविद्यालयः ऊनायां डोघीक्षेत्रे हिमाचलशासनविधायक रणजीतसिंहेन संचालितः। इत्थं राजभिः स्वराज्याधिकारसमाप्तिम् यावत् स्व-2 राज्ये संस्कृतस्य अध्ययनस्य अध्यापनस्य च व्यवस्थापि कृत्वा संस्कृतं संसेविम् संस्कृतविदुषां पर्याप्तः समादरः सम्मानश्च कृतः।[7] इत्थं सिद्धयति यत् नैकरियासतेषु संस्कृताध्यापनस्य व्यवस्था आसीत्।

प्रशासकानां योगदानम

स्वतंत्रताया अनन्तरं प्रशासका अपि प्रशासने संस्कृतविद्यालय-अकादम्यादिसंस्थापनेन नैकसंस्कृत। विकासकार्यैः संस्कृतं प्रोत्साहिवन्तः। एतेषु मुख्या आसन् -डॉ. यशवंतसिंहपरमारः, राजावीरभद्रसिंहः, शान्ताकुमारः, जयरामठाकुरः इत्यादयः। संस्कृतसंरक्षणे एतेषां योगदानमधस्तात् प्रस्तूयते-

1. डॉ. यशवंतसिंहपरमारः

हिमाचलसंस्थापकेन श्रीमता यशवंतसिंहपरमारमहोदयेन प्रशासने संस्कृतस्य विकासाय महद्योगदानं दत्तम्। श्रीलालसिंहप्रार्थिना अन्यैश्च संस्कृतशुभैषिभिः सह मिलित्वा संस्कृतविकासाय भूरिशः प्रयतितम्-हिमाचल प्रदेशराज्यभाषासंस्थानस्य स्थापनोपरान्तमत्र हिमाचलीभाषाविकास कार्यारंभो जातः एतस्य सूत्रपातः स्व. श्रीलालचन्द्रप्रार्थीमहाभागस्य प्रेरणया मुख्यमन्त्रिणा डॉ. परमारेण कृतः। श्रीप्रार्थीमहाभागेन प्रदेशस्य सर्वेऽपि संस्कृतविद्वांसः स्वविश्वासे गृहीताः। तैः साकं परामृष्टम्। आचार्यदिवाकरदत्तशर्मणः प्रयासेन तत्कालीनैः मुख्यमंत्रीवर्यैः स्व. यशवंतसिंहैः राजस्वमंत्रिणा लालचंदप्रार्थिना विस्तृत विचार-

विमर्शपूर्वकं हिमाचलप्रदेशभाषा-संस्कृति विभागनिदेशालयस्य स्थापना 1973 तमे वर्षे कृता।[8] हिमाचलभाषाणां संस्कृतमूलत्वात् प्रार्थीमहाभागेन पार्वत्यभाषाविकासेन साकं संस्कृतप्रसाराय विकासाय च पूर्णस्थानं देयमिति भृशं समुद्घोषितम्। अस्मिन्नवसरे तत्कालीनविधायकस्य श्री रणजीतसिंहवर्मणः भाषणमपि महत्वपूर्णमभूत्। अयं बहुभ्यः वर्षेभ्यः ऊनामण्डलान्तर्गतं डोघीस्थाने संस्कृतमहाविद्यालयस्य सञ्चालनं करोति स्म। संस्कृतभाषायाः संस्कृतसाहित्यस्य च लोकेषु प्रसारः अस्य विभागस्य स्थापनाया मुख्योद्देश्यमासीत्। हिमाचलस्य सर्वा अपि लोकभाषाः संस्कृतमूलाः, अतः भाषा-संस्थानं संस्कृत भाषोत्थानाय कार्यं करिष्यति इत्यपि स्थापनाया उद्देश्यमासीत्। रक्षाबन्धनपर्वणि संस्कृतदिवसोपलक्ष्येयं विभागः संस्कृतकवीनां कृते सम्मलेनादिकस्य आयोजनं करोति। लेखकेभ्य प्रोत्साहनराशिरपि दीयते। संस्कृतपत्रकारितामभि लक्ष्यीकृत्य अकादमीद्वारा संस्कृत-स्मारिकाः प्रकाशिता। संस्कृतदिवसोपलक्ष्ये प्रस्तुत संस्कृतकवितानां संकलनं 'ऋतम्भरा' नाम्नि स्मारिकायां कृतम्। 'श्यामला' इत्याख्यायाः संस्कृतपत्रिकाया अपि प्रत्येकं वर्षे प्रकाशनं भवति। संस्कृतपत्रिकाया प्रवेशांकः 1989 ईस्वी. वर्षे प्रकाशिता। एवं संस्कृतभाषायाः समृद्धयै अकादमी महत्त्वपूर्णस्थानमावहति।

राजावीरभद्रसिंहः-

संस्कृतस्य पारम्परिकमहाविद्यालयानां संरक्षणदिशि प्रशासकस्यास्य महत्त्वपूर्णम्वदानं सदैव स्मरिष्यते। अयं संस्कृतभाषाया परमानुरागी आसीत् । अस्य मुख्यमन्त्रित्वकाले हिमाचले संस्कृतस्य अभूतपूर्वः विकासः संजातः। डॉ. परमारस्य दिवंगते सति वीरभद्रस्य शासनं समागतम्। संस्कृतिभाषाकला विषयेषु अस्य महती रुचिरासीत्। अतः भाषाविभागे कर्मचारिणाम् संख्या प्रभूता संजाता। पारम्परिकसंस्कृतमहाविद्यालयेषु संख्या न्यूनवात् संस्कृतविद्यालयानां समाप्तिनिर्णयप्रस्तावः मन्त्रिपरिषदा निर्णीतः। फलतः प्रदेशे संस्कृतविद्यालयरक्षणार्थं प्रदेशव्याप्यान्दोलनमभवत्। विकटेस्मिन् काले आचार्यश्रीदिवाकरमहोदयः वीरभद्रसिंहमहोदयं संस्कृतमहाविद्यालयानां रक्षणार्थं सर्वकारं सम्प्रार्थितवान्। श्रीवीरभद्रसिंहनेतृत्वे हिमाचलप्रदेशस्य मन्त्रिमण्डले पुनः संस्कृत। महाविद्यालयानां रक्षाया प्रस्तावः आनीतः, मन्त्रिमण्डलस्य सभायां

श्रीलालचन्द्रप्रार्थीमहोदयेन अयं प्रस्तावः समर्थितः। संस्कृतसमाजः अस्य कार्यस्य कृते उभयोरपि ऋणी भविष्यति। प्रदेशस्थानां महाविद्यालयानां स्तरनिर्धारणाय पूर्वप्रशासकै रूपेक्षा एव दर्शिता, किन्तु वीरभद्रसिंहेन काविमहोदयस्य शिक्षा सचिवत्वकाले सर्वविधानियमानां निर्मितिः कृता। इत्थं पारम्परिकसंस्कृतमहाविद्यालयानां संरक्षणेन शास्त्रपरम्परा संरक्षिता। फलतः संस्कृतशिक्षायाः मूलाधाराः संस्कृतमहाविद्यालयाः डिग्री कालेजसमं निर्धारिताः। संस्कृतमहाविद्यालयानां स्तरोन्नयनं संजातम्। शासनस्तरे पञ्चसंस्कृतपाठशालाः संस्कृतमहाविद्यालयरूपेण परिवर्तिता।[9] एतेषु पञ्च महाविद्यालयास्सन्ति-

1. संस्कृतमहाविद्यालयः फागली, शिमला
2. संस्कृतमहाविद्यालयः क्यार्टूः
3. संस्कृतमहाविद्यालयः सुंदरनगरम्
4. संस्कृतमहाविद्यालयः नाहनम्
5. संस्कृतमहाविद्यालयः सोलनम्

सम्प्रति पारम्परिकसंस्कृतशिक्षायाः प्रचारे प्रसारे शास्त्र-संरक्षणदिशि च एते महाविद्यालयाः संरतास्सन्ति।

श्रीवीरभद्रसिंहेन हिमाचलप्रदेशसंस्कृत अकादम्या कृते संस्कृतविकासार्थं अनुदानव्यवस्था, संस्कृतकवीनां कृते विविध पुरस्कारयोजनाः, मन्दिरेषु कर्मकाण्ड कर्तृणाम् कृते प्रशिक्षिणव्यवस्थादीनां व्यवस्था कृता। 15 अगस्त 2015 तमे वर्षे हिमाचलस्य विद्यालयेषु दशमकक्षापर्यंतं संस्कृत भाषा अनिवार्यविषयरूपेण पाठयिष्यते इति घोषणा कृता, किन्तु नैक-प्रशासनिककारणैः क्रियान्वितिः नाभवत्। अस्य मुख्यमन्त्रित्वकाले संस्कृतमहाविद्यालयतुङ्गेशस्य संस्कृतमहाविद्यालय- सराहनस्य च अधिग्रहणम् संजातम्।[10] इत्थं वीरभद्रसिंहस्य मुख्यमन्त्रित्वकाले प्रदेशे संस्कृतस्य अभूतपूर्वः विकासः संजातः।

2. शान्ताकुमारः

शान्ता कुमारः हिमाचल प्रदेशस्य सुविख्यातः प्रशासकः साहित्यकारश्च अस्ति। ''संस्कृतप्रचारकं'' इति पत्रस्य प्रधान-सम्पादकेन प्रख्यातविदुषा नरदेवशास्त्रिणा अस्य संस्कृतानुरागित्वं संस्कृतभावानुवादेन प्रकटितम्। ''संस्कृत भाषामाध्यमेन सार्वकालिकं सार्वदेशिकञ्च शाश्वतं मानवजीवनमूल्यमावि'' कृतम्।

भारतीयायाः संस्कृतेः परम्परायाश्च मौलिकं स्रोतः संस्कृता वाक् । अस्याः देववाण्याः विकासार्थं परीरक्षणार्थञ्च सर्वथा प्रयासारम्भः अस्माकमपरिहार्यं कर्तव्यम्। यदा संस्कृतं वाक् तदा भारतीया संस्कृतिः हिमाचलीया च परम्परा चिरं संस्थास्यते। आहतायाञ्च तस्यां सर्वमेव विनक्ष्यति।''[11] -संस्कृतभावानुवादः (शान्ताकुमारः)

3. प्रेमकुमारधूमलः-

अस्य मुख्यमंत्रित्वकाले 22-08-2002 तमे वर्षे 'कण्डाघाट' इतिस्थाने बदरिकाश्रमस्य शंकराचार्याणां श्रीकृष्णबोधाश्रम-महाभागानां सानिध्ये संस्कृतअकादम्या विधिवद् उद्घाटनं प्रदेशमुख्यमन्त्रिणा श्रीप्रेमकुमारधूमलेन कृतम्। स्थापनाकाले मुख्यमन्त्रिणा भणितम् संस्कृत- अकादमी संस्कृतभाषायाः प्रचारप्रसारकृते नवदिशा। निर्माणम् करिष्यति। संस्कृतभाषायां समुपलब्धानां प्राचीनपाण्डुलिपीनां संरक्षणमपि करिष्यति।

4. जयरामठाकुरः

जयरामठाकुरस्य मुख्यमन्त्रित्वकाले संस्कृतक्षेत्रे बहूनि विकासकार्याणि जातानि। एतेषु मुख्यानि- हिमाचलप्रदेशस्य द्वितीयराजभाषारूपेण संस्कृतस्य स्वीकृतिः तृतीयकक्षातः विद्यालयेषु संस्कृतस्य पाठनम्। मुख्यमन्त्रिणः जयरामठाकुरस्य अध्यक्षतायां मन्त्रिपरिषदा संख्याः एल.सी.डी.- (12)-2/2010 इत्यनुसारं संस्कृतस्य द्वितीय-राजभाषारूपेण अनुमतिः प्रदत्ता।[12] संस्कृतभाषाया उन्नयनार्थं पृथक्प्रभागस्य स्थापनाया समुद्घोषणापि कृता।[13] संस्कृतस्य विषये एतेषां विचारा सन्ति-

knowledge of Sanskrit is highly respected by the academic community- Sanskrit literature offers an expansive view of human nature and its role in creation-In this era of unprecedented change and uncertainty, it can be a valuable tool to assess and look afresh at society.

Sanskrit language was also known as 'Devwani' and the steps taken by the State Government in popularizing this language has been appreciated at various levels. He said that even Prime

Minister Narendra Modi has lauded the decision of the State Government to give status of second language to Sanskrit. He said that efforts would be made to make Sanskrit more simple and practical so as to popularize it amongst the masses.

Sanskrit language was also considered as the best language for computer software. He said that the State Government was also contemplating to open a Sanskrit University in the State for which land was being identified. He said that Sanskrit scholars and Sanskrit Academy should come forward with suggestions to make this language as common man language so that students could be motivated to study the language.

अस्य नेतृत्वे संस्कृतमहाविद्यालय डंगारस्य अधिग्रहणं संजातम्।[14] एवं संस्कृतमहाविद्यालयानां संख्या अष्ट संजाता। एतदतिरिक्तम् बहव्यः योजनाः प्रकल्पाः निर्णयाश्च सर्वकारेण भिन्न-2 समये निर्णीताः, येषां पूर्णतया क्रियान्वयनं न संजातम्। एतेषु मुख्यास्सन्ति-

शास्त्री-पदस्थानां संस्कृताध्यापकानां कृते टी. जी. टी. संस्कृतम् पदनामव्यवस्था, तृतीयकक्षातः विद्यालयेषु संस्कृतस्य पाठनम्, संस्कृतविश्वविद्यालयस्य स्थापना, राजकीयमहाविद्यालयेषु संस्कृतपदसर्जनम्, माध्यमिकपाठशालासु संस्कृतविषयः इत्यादयः।

एवं उपर्युक्तप्रतिपादितैः तथ्यैः सिद्धमिदं प्राचीन-कालादेव हिमाचले संस्कृतस्य भूयान् प्रचार आसीत्, संस्कृतभाषायां राजप्रशस्तयः राजवंशावल्यश्चात्र प्रमाणम्। धर्म-संस्कृत्यनुरागिणः राजानः स्वशासनकाले संस्कृतस्य महतीं सेवां कृतवन्तः। आंग्लशासनकाले देवभूमौ हिमाचले संस्कृतनिरासाय बहूनि षड्यंत्रपूर्णकार्याणि जातानि किन्तु संस्कृतानुरागिभिः शासकैः संस्कृतविदुषां प्रश्रयप्रदानेन, संस्कृतसंस्थानां स्थापनया, धर्म-संस्कृतिपरम्परा शास्त्रपरम्परा च संरक्षिता। एवमेव मैकालेशिक्षापद्धत्या प्रभावेण संस्कृतशिक्षा आभारते विनष्टप्राया संजाता, किन्तु संस्कृतनुरागीप्रशासकानां साहाय्येन प्रदेशस्थैः संस्कृतविद्वद्भिः आचार्यैश्च देवभूमौ हिमाचले शिक्षाव्यवस्थायां संस्कृतं समुचितं स्थानं प्रदाय न

केवलं संस्कृति संरक्षिता अपितु आभारते संस्कृतविकासस्य आदर्शरूपः (मॉडल) उपस्थापितः।

सन्दर्भग्रन्थारूपत्रिकाश्च-

1. *बलोखरा, जगमोहन, अलौकिक हिमाचल प्रदेश, the wonderland, एच जी पब्लिकेशन नई दिल्ली।*
2. *दिव्यज्योतिः,(पत्रिका) सयुक्तांकः, 1956-57, संस्कृत शोध संस्थान मशोबरा, शिमला हि. प्र.।*
3. *राजपत्र, हिमाचल प्रदेश, HP Gazatte notification*
4. *वेबसाइट, हिमाचल प्रदेश जन सूचना एवं सम्पर्क विभाग।*
5. *संस्कृत प्रचारकम्, दिल्ली मई-जून 1991*
6. *शर्मा, आचार्य केशव, हिमाचल प्रदेश का संस्कृत साहित्य, हिमाचल कला संस्कृति भाषा अकादमी शिमला।*
7. *शर्मा, ओ. पी., हिमाचल संस्कृत साहित्य का इतिहास, हिमाचल कला संस्कृति भाषा अकादमी- शिमला।*

सन्दर्भः-

1. *क्वधुना मन्दिरे मन्दिरे जय जय ध्वनिः ? क्व सम्प्रति तीर्थे तीर्थे घण्टानादः ? मठे मठे वेदघोषः? अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्म शास्त्राप्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते भाष्याणि अंशयित्वा भ्रष्टेषु भज्यन्ते क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित्तुलसीवनानि छिद्यन्ते, क्वचिद् दारा अपहियन्ते, क्वचिद् धनानि लुण्टयन्ते, क्वचिदार्तनादाः, क्वचिद् रुधिरधाराः क्वचिदग्निदाहः क्वचिद् गृहनिपातः इत्येव श्रूयतेऽवलोक्यते च परितः । शिवराजविजये, प्रथमनिश्वासः।*
2. *हिमाचल संस्कृत साहित्य का इतिहास, डॉ. ओम प्रकाश शर्मा, पृ. 62*
3. *हिमाचल प्रदेश का संस्कृत साहित्य, प्रो. केशव शर्मा , पृ.-147*
4. *संस्कृतप्रचारकम्, मई-जून 1991*
5. *हिमाचल प्रदेश का संस्कृत साहित्य, प्रो. केशव शर्मा, पृ. 148*

6. *अलौकिक हिमाचल प्रदेश, the wonderland, जगमोहन बलोखरा, पृ. 552*
7. *हिमाचल प्रदेश का संस्कृत साहित्य, प्रो. केशव शर्मा , पृ.147*
8. *दिव्यज्योतिः, अक्टूबर 1984, पृ.13*
9. *अधिसूचना सं.- No : Kha (9) -2/81-Shiksha -Ka-2 , दिनांक 20 दिसम्बर 1999*
10. *राजपत्र, हिमाचल प्रदेश, 13 अप्रैल 2017*
11. *संस्कृतप्रचारकम्, पृ.14*
12. *संख्या एल एल आर डी (6)-6/2019 राजपत्र संख्या- शिमला 2,17 मई 2019*
13. *No-999/2020 PUB हिमाचल प्रदेश सरकार सूचना एवं जनसंपर्क विभाग*
14. *No. EDN-A-Ka(1)-16/2016.राजपत्र संख्या-17th June, 2021*

8

विनिबन्ध-समीक्षा

गणेशीलालः सुथारः

नवदेहलीस्थेन 'साहित्य अकादेमी' संज्ञकेन राष्ट्रस्तरीयसंस्थानेनानेकेषां महामनीषिणामुदारचेतसां महापुरुषाणां प्रथितयशसां सरस्वतीसमुपासकानां साहित्यकाराणां साहित्यसमीक्षादक्षाणां विपश्चिताञ्च व्यक्तित्व-कृतित्वपरिचायकानि संक्षिप्तजीवनवृत्तानि विनिबन्धविधया आधिकारिक ग्रन्थकार ग्रथितानि समये-समये प्राकाश्यमनायिषतेत्येतत् कस्य सचेतसश्चित्तं नानुरञ्जयितुं क्षमते? तद्विनिबन्धमणिमालायां सुरसरस्वतीसमाराधनैकव्रतस्य भारतीयसंस्कृति-वैशिष्ट्यव्याख्यानविचक्षणस्य संस्कृतनाटकप्रणयनपटिष्ठस्य संस्कृतनाट्यशास्त्र-पारदृश्वेन आधुनिकसंस्कृतसाहित्यसमीक्षकाणां धुरि कीर्तनीयस्य भारतीय संस्कृतिनिष्ठसदाचारपरिपूतत्वात् शरीबद्धः संस्कृतिपुरुष इव प्रथितस्य सागरस्थ डॉक्टरहरीसिंहगौरविश्वविद्यालयीयसंस्कृतविभागे आद्याचार्य-पदमधिष्ठितवतो राष्ट्रपतिसम्मानितस्य उपाध्यायो डॉ. रामजीमहाभागस्य संक्षिप्त जीवनवृत्त निरूपणात्मकः 'रामजीउपाध्याय' इत्यभिधो विनिबन्धोप्येकविंशत्यधिक द्विसहस्त्रतमे खीष्टाब्दे प्रकाशित इत्येतन्नूनं सुरभारतीगौरवस्याभिवृद्ध्यै कल्पते।

अस्य विनिबन्धस्य प्रणेता सागरस्थ डॉक्टर हरीसिंह गौर विश्वविद्यालयीयसंस्कृतविभागस्य सहायक आचार्यो युवा संस्कृतसुधीः डॉ. सञ्जय कुमारमहोदयोऽस्ति सर्वथाधन्यवादार्हः। मन्ये स्वकीयविभागस्याद्याचार्यचरस्य उपाध्याया डॉ. रामजीमहाभागस्य महीयसो महिम्नो विज्ञानानन्तरं डॉ. यादवमहोदस्य मनसि तद्विषयेऽतिशायिनी श्रद्धाऽऽविष्टवती। आविष्टश्रद्धान्तः-करणश्च स मननमकार्षीत्। ततः स तज्जीवनवृत्तलेखने सम्प्रावर्तिष्ट। श्रद्धाया मननहेतुत्वमेवमभ्यधायि छान्दोग्योपनिषच्छ्रुतौ- ''यदा वै श्रद्दधात्पथ मनुते

नाश्रद्दधन्मनुते श्रद्दधदेव मनुते... ।'' (7.19.1) एतद्विनिबन्धस्य ''रामजी उपाध्याय की साहित्यिक अभिरुचि एवं आधुनिक संस्कृत विकास-यात्रा, रामजी उपाध्याय का व्यक्तित्व एवं कृतित्व, गद्य-साहित्य, नाटय-साहित्य, आलोचना-साहित्य, समाज-दर्शन, नवीन उद्भावनाएँ'' इत्यभिधसप्तस्वध्यायेषु महामनीषिणः उपाध्यायडॉ.रामजीमहाभागस्य जीवनचरितमभिलक्ष्य सर्वविधवैशिष्ट्यं विदुषा लेखकेन सूक्ष्मेक्षिकया स्पष्टं न्यरूपि। सुरभारतीसमाराधनतत्परस्य उपाध्यायमहाभागस्य सर्वा अपि कृतयः सन्ति नवनवोन्मेषशालिन्यः। संस्थापक-सम्पादकत्वेन सागरिकासंज्ञकायास्त्रैमासिकसंस्कृतशोधपत्रिकायाः सततम् सुष्ठुप्रकाशनेन प्रोफेसर रामजीउपाध्यायमहाभागस्य समुद्रकल्लोलघातसहाकीर्तिः सम्पूर्णविश्वस्य सुरभारतीसुधीसमवाये सुप्रथिताऽभूत्। अत एव विश्वनाथनगर्यां वाराणस्यामायोजितस्य विश्वसंस्कृतसम्मेलनस्यावसरे काशीहिन्दूविश्वविद्यालयेन विशिष्टदीक्षान्तसमारोहे महामनीषी स संस्कृतविषये मानद-डी.लिट. इत्युपाधिना सबहुमानं सभाजितः। ''कीर्तिर्यस्य स जीवति'' इतीयं सूक्तिरुपाध्यायरामजी महाभागविषये सर्वथा सङ्गच्छते।

एतादृशमहामनीषिणो जीवनवृत्तवैशिष्ट्यनिरूपकोऽयं विनिबन्ध आधुनिकसंस्कृतविद्वत्समाजं सुरसरस्वत्याः सततसमाराधनार्थमवश्यं प्रेरयिष्यतीति। डॉ. सञ्जयकुमारमहोदयेन एतद् विनिबन्धं विरचय्य मनीषिणां माननीस्य आचार्य-रामजीउपाध्यायमहाभागस्यैषा वाङ्मयी अभ्यर्चनाऽकारीत्यतः स संस्कृतविद्वज्जगतः सभाजनभाजनम्। एतत्तु परमं भागधेयं मन्यते यदयं जनोऽपि महामनीषिणः प्रोफेसररामजी-उपाध्यायमहाभागस्य सारस्वतसाधनापीठे (डॉक्टर-हरीसिंहगौरविश्वविद्यालयीयसंस्कृतविभागे) तत्प्रधानशिष्यस्य विश्वविश्रुत संस्कृत-विदुषः प्रोफेसर (डॉ.) राधावल्लभत्रिपाठिमहाभागस्याध्यक्ष्ये रीडरपदनियुक्तो विंशतिमासन् यावत् अध्यापनमकार्षीत्। अपि च, डॉक्टर हरीसिंह गौरविश्वविद्यालयीयसंस्कृत- विभागेऽध्यापयन्ननुसंदधानश्च डॉ. सञ्जयकुमार-महोदयः स्वविभागीयसुधीसहयोगिसहितः उपाध्यायो डॉ. रामजीमहाभागस्य सारस्वतसाधनां पूर्वाचार्यैरविच्छिन्नप्रवाहां सानुबन्धां कुर्यादिति कामयमानो विरमत्ययं सुरसरस्वती- समुपासको जनः।

लेखक-परिचयः

डॉ. बालकृष्णशर्मा - साहित्यविभागाध्यक्षः
शासकीय-संस्कृतमहाविद्यालयः
ग्वालियरम् (म.प्र.)

डॉ. किरण आर्या - सहा. आचार्यः, संस्कृतविभागः,
डॉ. हरीसिंह-गौर-केन्द्रीय-विश्वविद्यालयः,
सागरम् (म.प्र.) 470003

डॉ. शुभ्रजित सेनः - सहायकाध्यापकः, संस्कृतसंकायः,
गौडवङ्गविश्वविद्यालयः, पश्चिमवङ्गः

डॉ. सुकदेव वाजपेयी - संस्कृतविभागाध्यक्षः
स्वामीविवेकानन्दविश्वविद्यालयः
सागरम् (म.प्र.)

डॉ. नौनिहाल गौतमः - सहा. आचार्यः, संस्कृतविभागः,
डॉ. हरीसिंह-गौर-केन्द्रीय-विश्वविद्यालयः,
सागरम् (म.प्र.) 470003

डॉ. दिनेशशर्माभारद्वाजः - सहायकाचार्यः, (साहित्य-विभागे)
राजकीयसंस्कृतमहाविद्यालयः क्यार्टूः
जिला-शिमला, हिमाचलप्रदेशः

डॉ. गणेशीलालः सुथारः - (राष्ट्रपति-सम्मानितः) पूर्वनिदेशकः
पण्डितमधुसूदन-ओझा
शोधप्रकोष्ठः संस्कृतविभागः
जयनारायणव्यासविश्वविद्यालयः जोधपुरम्